कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M624 विषय पुराण

नाव. मल्लारि माहात्म्य (M88) ✓

लेखक/लिपीकार सखाराम बढे लिखितम्

पृष्ठ 72 काळ शके 1744 पूर्ण/~~अपूर्ण~~

Check [illegible] 2012

श्रीगणेशायनमः॥श्रीसरस्वत्यैनमः॥श्रीगुरुभ्योनमः॥श्रीम्हाल
सायुक्तमल्लारिमार्तंडायनमः॥ॐ अस्यश्रीमल्लारिमाँत्म्यस्तोत्रमं हा
त्रस्य॥सनत्कुमारऋषिः॥श्रीसदाशिवस्वरूपीमल्लारिर्देवता॥अ
नुष्टुप्छंदः॥मार्तंडभैरवेतिबीजं॥महामारीतिशक्तिः॥घृतमा
रीतिकिलकं॥श्रीमल्लारिमार्तंडप्रीत्यर्थंमल्लारिमाहात्म्यस्तोत्रमंत्र
जपेविनियोगः॥अथन्यास॥ॐ ह्रां अंगुष्ठाभ्यांनमः॥ॐ ह्रीं तर्ज
नीभ्यांनमः॥ॐ ह्रूं मध्यमाभ्यांनमः॥ॐ ह्रैं अनामिकाभ्यां०॥ॐ ह्रौं

म॰भा॰ कनिष्ठिकाभ्यांनमः॥ॐ क्रः करतलकरपृष्ठाभ्यां॥ॐ क्रां हृदया
॥२॥ यनमः॥ॐ क्रीं शिरसे स्वाहा॥ॐ क्रूं शिंये वषट्॥ॐ क्रैं कवचा खा
य हुं॥ॐ क्रौं नेत्रत्रयाय वौषट्॥ॐ क्रः अस्त्राय फट्॥अथ ध्या
नं॥ध्यायेन्मल्लारिदेवं कनकगिरिनिभं म्हालसाभूषितांकं श्वेता
श्वंखड्गहस्तं विबुधबुधगणैः सेव्यमानं कृतार्थैः॥युक्तांघ्रिं दै
त्यमूर्ध्नि डमरुविलसितं नैशचूर्णाभिरामं नित्यं भक्तेषु तुष्टं श्व
गणपरिवृतं नित्यमोंकारगम्यं॥मूर्त्तिर्मे हीमयी शंभोर्ध्येयामा॥२॥

र्तें डभैरवी॥ अश्वेनसादिनापार्श्ववर्त्तिनामणिनायुता॥१॥ शिरःस्रे
तंचपादाधोमूर्त्यामल्लस्यवर्त्तते॥ त्रिशूलं डमरुं खड्गं पानपात्रं
धराशुभा॥२॥ युक्ताचगंगामालस्यासर्वालंकारशोभिनी॥
वस्त्राद्यलंकृतांसोम्यांचिंतयाम्यनिशंशुभां॥३॥ इतिध्यानं॥
अथमानसोपचारैःसंपूज्य॥ अथजपः॥ ॐ वाग्वल्लीपल्लवोल्ला
लसरागकरभासुरं॥ गजास्यंसुंदरंवंदे वृंदारकगणार्च्चितं॥
॥१॥ विघ्नेशाचरणांभोजमकरंदोदबिंदवः॥ सिंचंतुभारतींव

ल्लींनतानांवदनालये ॥२॥ कैलासाचलचूलाग्रेमणिसुंदरमं
दिरे ॥ पप्रच्छपार्वतीकांतंरहस्यानंदसुंदरं ॥३॥ प्रियंकिंदुर्ल
भंलोकेकिमाश्चर्यकरंपरं ॥ क्षेत्रंतीर्थंसदानॄणांभुक्तिमुक्तिफ
लप्रदं ॥४॥ भवतारेणकेनत्वंसर्वेषांसुलभःसदा ॥ केव्रतैस्त्वं
समाराध्यःकथयाशुममप्रभो ॥५॥ श्रीशिवउवाच ॥६॥ पुराकृ
तयुगेकालेभ्रष्टवीर्यान्मुनीश्वरान् ॥ सनत्कुमारोऽकथयद्दुःख
दारिद्र्यपीडितान् ॥७॥ तत्क्षेत्रंतीर्थमध्येकंभुक्तिमुक्तिफलप्रदं ॥

अधिष्ठितं मर्यादे वितयाच्चकृपयान्वणां ॥८॥ तद्वक्ष्यामि महा
व देविप्रेम्णातवैरानने ॥९॥ सनत्कुमारउवाच ॥१०॥ पुराधर्मसुताः
ससमणिचूलंगिरिंगताः ॥ तपस्तेपुस्तदातीव्रमेकाग्रहृदयस्थिताः
॥११॥ शांतादांताःसदाचाराःसदाराःसपरिग्रहाः ॥ आश्रमेरमणी
यस्मिन्वृक्षवल्लीसमा~~कुमा~~कुले ॥१२॥ शांतवैरमृगव्याघ्रबभ्रूरग
समाकुले ॥ सर्वर्तुफलसंकीर्णेकदलीखंडमंडिते ॥१३॥ रसालस
रलोल्लोलतरुणारुणपल्लवे ॥ सुच्छायशीतलोपांतेमयूरावलिकूजि

ते ॥१४॥ कदाचित्तत्र मल्लारव्योदेस राजः समागतः ॥१५॥ ज्वालाक
रालवदनो राक्षसैः परिवारितः ॥ उदग्रकरवालाग्रधाराछिन्नम
हीरुहः ॥१६॥ पदातिरथनागाश्वोद्घोषव्याकुलितामरः ॥ लोहस
न्नाहकिरणोन्मिश्रितार्कांशुमंडलः ॥१७॥ आश्रमास्तेन विध्वस्ता
समस्ताअपि विस्तृताः ॥ आक्रंतास्तरवास्तुंगाः सामरैः कुंजरैः
करैः ॥१८॥ लोललांगूलचरणैर्घटीयंत्रावलिर्हता ॥ कुंडस्थाव
र्हिषस्तस्य पुत्रैः पौत्रैर्निषेविताः ॥१९॥ चिचायदेवतार्चायाः कुसुमा
नि महीरुहां ॥ पूजावेदिषु रंम्यासु पानकेलीश्चकार सः ॥२०॥

निहेतुः राक्षसानां खरखायत्र । कीर्णे मही तले ॥ वेदानामिव शास्त्रे नम
स्तानोरातराः कृताः ॥

जहौ तदाश्रमपदं सौंदर्यं दुःखतो निजं ॥ मुखं सद्यो विशस्तायास्तरुण्या
खतक्षणात् ॥२१॥ बटवः पठवोध्यायेस्फूर्जत्तर्जिनतर्जिताः ॥ हताः
कामदुघा गावो यज्ञियाः पीवरोधसः ॥२२॥ व्याकुलीकारयामास शां
तादांताः पतिव्रताः ॥ ऋषयः कंठपाशाद्यैर्बध्वा वापीषु मज्जिताः ॥
॥२३॥ इति दुःखाभिभूतास्ते गते तस्मिन्दुरात्मनि ॥ किं कुर्मः क्व च
गच्छामः क्व वसामः सुदुःखिताः ॥२४॥ कं विभुं कथयिष्यामो विभुः
कः पालयिष्यति ॥ कृतमस्माभिरतुलं दुःकृतं तन्न विद्महे ॥२५॥

कष्टं कष्टमहोत्राता नास्त्यनाथा वयं बत॥ यं नालं जेतुमिंद्रोपि क
थं जेष्यंति तं नृपाः॥२६॥ शापामश्चेद्दुरात्मानं तपोहानिर्भविष्यति॥
जजल्पुरिति ते सर्वे भयविक्लवचैतसः॥२७॥ वृत्तांतमेनं देवेंद्रं
नारायणमथाब्जजं॥ किं वा महेशं सर्वेशं कथयामः सुदुःखिताः॥
॥२८॥ अस्ति गूढतमं किंचित्स्थानं यत्सर्वतांतरे॥ कुटुंबान्यग्निहो
त्राणि न्येष्यामस्तत्र किं वयं॥२९॥२६॥ इति श्रीब्रह्मांडपुराणे क्षेत्र
खंडे श्रीमल्लारिमहात्म्ये आश्रमेपीडनं नाम प्रथमोध्यायः॥१॥
॥७७॥ सनत्कुमार उवाच॥१॥ अथ ते मुनयः सर्वे दूनचित्ताः सुदुः

रिवताः ॥ गोपाख्यन्चकुंटुंबानिकस्मिंश्चित्सर्वतांतरे ॥२॥ ययुःसहस्र
नयननगरीममरावतीं ॥ सुधर्मायांसभायांतमासीनंददृशुःक्षणात् ॥
॥३॥ ज्वलद्रत्नावलीप्रांशुतेजोजालसुशोभिते ॥ सिंहासनेवीज्य
मानंचामरैर्हरिणीदृशां ॥४॥ यमग्निःसेवतेनित्यंदाहकर्मवि
हायन्च ॥ मूर्यासुंदरयारम्यपुंजवच्छांततेजसा ॥५॥ सरोषंकर्म
मुक्त्वैवयमोभूत्वाकृतांजलिः ॥ त्यक्त्वासराक्षसींवृत्तिमुपास्तेनै
र्ऋतःस्वयं ॥६॥ पाशभृत्सुरतस्तिष्ठन्वरुणःकिंकराकृतिः ॥ वा
युर्मूर्त्तिधरःशांतःप्रांजलिःपरिसेवते ॥७॥ निधिहस्तःसदारा

जराजस्तिष्ठतितत्पुरः॥रम्यमूर्त्तिधरःश्रीमानुपास्तेसोदिवाकरः
॥८॥भजनेसर्वभावेनदेवःकुमुदबांधवः॥संतोषयतिदेवानामा
चार्यश्चानुवर्णनैः॥ ॥गायंतिललितैर्गीतैर्गंधर्वाःसुमनोहरं॥
सिद्धचारणनागाद्यानिजविद्याभिरावृताः॥१०॥अतोषयन्स
भावेनभक्त्यासंपूर्णयापृथक्॥कांतारंभादयोनित्यंललितैर्यमु
पासते॥११॥तत्रागतान्समालोक्यधर्मपुत्रान्मुनीश्वरान्॥सिं
हासनात्समुत्थायभक्तिपूर्वंननामसः॥१२॥शक्रउवाच॥१३॥

पूर्वं पूर्वं मयायच्च जन्म जन्मांतरादपि ॥ उपार्जितं महापुण्यं फलितं दर्शनि
नवः ॥१४॥ अस्मात्सुकृतपुण्यानां महती भवतां कृपा ॥ स्वयमुत्कंठिता
यूयं प्रीत्या यत्स्वयमागताः ॥१५॥ धन्योस्मि कृतकृत्योस्मि कृतपुण्यो
स्मि सर्वथा ॥ सत्यं स्वर्गाधिपत्यं मे भवतामद्य दर्शनात् ॥१६॥ अद्यप्र
भृति निर्विघ्नं मम कृ संभविष्यति ॥ निविघ्नकरणाय यूयं गणेशा इव नि
घ्नकराः ॥१७॥ आदिशध्वं यथाकार्यं येन यूयं समागताः ॥ श्रांताः क्लां
ताः पथायासादतिम्लानमुखश्रियः ॥१८॥ ऋषय ऊचुः ॥१९॥ हर्त्ता

कर्त्तास्त्वयंशास्ताभवांस्त्रिजगतां विभुः॥ तपस्त्वमनुतिष्ठामो भवदत्ताभ
योत्सवैः॥२०॥ कदाचिन्मृगयाव्याजाद्राक्षसैः परिवारितः॥ आजगा
माश्रमं नोसौ मल्लोकारि महाव्यथां॥२१॥ वयं संत्रासितास्तेन जीवशे
षायथास्थिताः॥ अतीतानागतज्ञानाद्देवो जानातिवर्त्तनं॥२२॥ किं
श्रूमः कष्टमतुलमास्तां तौ मणिमल्लकौ॥ उष्टौसुरेंद्र हंतव्यो देवेन श्री
मतात्त्वया॥२३॥ शक्रउवाच॥२४॥ तांभ्यांतु मणिमल्लाभ्यामभयोनिः सु
तोषितः॥ एकांगुष्ठेन तपसा धूम्रपानक्रियाविधेः॥२५॥ नाहंतयो

र्ध्धार्थाय समर्थौ ब्राह्मणोत्तमाः ॥२६॥ पराक्रमदुराध्धर्षौ तपोवीर्यमदोद्धतौ
विनेश्वरमजेयौ तौ दुष्टौ दुष्टबलोत्कटौ ॥२७॥ अयात यूयं वैकुंठं विभुर्ना
रायणः स्वयं ॥२८॥ इत्थं कदर्थितान् दृष्ट्वा भवतः क्षांततेजसः ॥ सपक्ष
पाताद्विप्राणां दानवान् हंतुमर्हति ॥२९॥ शाम्भन्नियोगितस्या हंस
विष्णुर्जगतांपतिः ॥ कर्तुं चनैव चाकर्तुमन्यथौं स मीश्वरः ॥३०॥ स्रष्टेः कर्तुं
सा कर्तास्वयँक्षात्स्वयं पालयिता विभुः ॥ हर्तासौ रुद्ररूपेण तस्मान्नास्त्यप
रः प्रभुः ॥३१॥ ऋषय ऊचुः ॥३२॥ वयं किंवै भवं विष्णोर्न विभो व

दशास्त्रतः॥ इतिहासपुराणेभ्यआगमेभ्योविशेषतः॥३३॥ देवोवद
तिकिंतस्यवात्सल्यंचपराक्रमं॥ अस्माकंदेवयोगेनशक्रोप्यक्षमतां
गतः॥३४॥ स्वस्त्यस्तुभवतेशक्रवयंयामोहरेर्गिरिं॥ जयशत्रुगणा
न्सर्वान्पाहिसाधुबुधादिकान्॥३५॥२६॥ ॥इतिश्रीब्रह्मांडपुरा
णेक्षेत्रखंडेश्रीमल्लारिमाहात्म्येशक्राभिगमनंनामद्वितियोध्यायः॥
॥२॥ ॥सनत्कुमारुवाच॥१॥ अथतेमुनयोजग्मुर्वैकुंठंगगनाध्व
ना॥ ध्यायंतश्चित्तपद्मेषुहृषीकेशंसुरेश्वरं॥ तेजसाससगुणितस्सू ॥८॥

र्यमंडलसुंदराः॥व्योम्नोवतेरुःसहसाविष्णोःप्रासादजाजिरे॥३॥ददृशु
स्तेसभांरम्यांवैष्णवींयत्रराजते॥सिंहासनसमारूढःपुंडरीकविलोचनः
॥४॥नीलोत्पलदलश्यामोनीलमेघघनच्छविः॥पीतांबरकृतोत्तर्यवसनः
पुण्यदर्शनः॥५॥चामीकरलसद्दीप्तिकेयूरकटकोज्वलः॥चंडांशुचं
डकिरणचारुकुंडलमंडितः॥६॥गंभीरनाभिर्विलसत्त्रिवलीललितो
दरः॥उल्लसत्स्मेरवदनःस्मितांश्वधरपल्लवः॥७॥ज्वलद्रत्नप्रभापुं
जग्रैवेयकविराजितः॥अमंदानंदसुखदश्चंदनैकविशेषतः॥८॥

म॰मा॰
॥९॥

स्वर्णयज्ञोपवीतीन्चसर्वसौंदर्यसागरः॥रत्नमालोज्वलग्रांशुसुवर्णमुकु
टाकृतिः॥९॥नारायणःसुराधीशः क्रतुर्भोक्तान्चतुर्भुजः॥ बद्धपर्यंकन्च
तुरोनिबद्धस्वस्तिकासनः॥१०॥कृतांजलिर्वैनतेयःस्वामिनोयस्यसे
वकः॥आसीनःपक्षिराजोसौयज्ञागारेध्वजोयथा॥११॥शंखचक्रग
दापद्मान्यायुधानिसमंततः॥मूर्तिमंतिसदारेजुस्तेजःपुंजाकृतीनि
च॥१२॥कृपयायेपरेशस्यभक्ताविष्णोःसनातनाः॥स्वरूपमुक्ति
भाजस्तेशंखचक्रगदाभृतः॥१३॥अतसीकुसुमश्यामाःसर्वेकम ॥९॥

ळधारिणः॥पीतांबरधराःसर्वेवनमालोपशोभिताः॥१४॥किरीटके
यूरधरामणिभूषाविराजिताः॥विमळांभोजनयनाःकुंडळैःकर्ण
भूषणाः॥१५॥प्रियायेभक्तवात्सल्यादृषयोनारदादयः॥कपिळाद्या
श्चयेसिद्धायेचान्येसनकादयः॥१६॥जगुर्गंधर्वपतयोगीतंचित्रर
थादयः॥अंगहारैःसुमधुरैर्ललितैश्श्रुतितोषकृत्॥१७॥प्रांगणेननृ
तुःकांतानीलोत्पलदलेक्षणाः॥स्वकंदर्पभल्लास्तास्तारुण्यरसनि
र्भराः॥१८॥चेतांसिव्याकुळीचक्रुर्मुनीनामपिसुंदराः॥भ्रमरीवेग

म॰ मा॰ तः स्वांगविकीर्णकिनकभ्रमाः ॥१९॥ नीलजीमूत्तसुछायेस्वामिसेवकसं
॥१०॥ कुले ॥ चंचलाइवरेजुस्ताः सभागारेनिजत्विषा ॥२०॥ तस्यांसभायांद
ष्ट्वैवंमुकुंदंसुरपूजित्तं ॥ प्रणेमुर्गद्गदगिरः कंपमानांगयष्टयः ॥२१॥ गा
त्रस्वेदजलाकीर्णविवर्णमुखमंडलाः ॥ रोमांचांचित्तगात्रास्तेबाष्पपू
रित्तलोचनाः ॥२२॥ निपेतुर्दंडवद्भूमौक्षणमुत्थायत्तेपुनः ॥ नुनुवुः श्री
महाविष्णुंधर्मपुत्राः सुसंयत्ताः ॥२३॥ ऋषयउचुः ॥२४॥ जयनित्यपरा
नंदकुंदमंदारजार्चित्त ॥ जयलक्ष्मीकुचांभोजराजहंसजगत्पते ॥२५॥ ॥१०॥
जयनीलोत्पलाभासहासचंद्रांशुशोभन ॥ जयप्रपंचरहित्तत्रिलोकी
लोकपालक ॥२६॥ जयखंडेंदुसद्भालमितचित्रचरित्रकृत् ॥ जयविश्व

शा विश्वात्मन्विश्वसर्गविधायका ॥२७॥ श्रीभगवानुवाच ॥२८॥ तुष्टोहमे
कभावेन परिष्वजत मां लघु ॥ संकल्माइव वश्चित्तस्य यूयं मे मुनयः स
दाऽऽक्रांताः संत्रासिताः केन हतभाग्येन दुर्मदात् ॥ कृतं केन तपोवि
घ्नं भग्नं वश्चित्तसोख्यकं ॥३०॥ निरूपयत तच्छीघ्रं येन कूर्मः प्रति
क्रियां ॥३१॥ ऋषय ऊचुः ॥३२॥ शक्रो बिभेति समरे याभ्यां तौ मणि
मल्लकौ ॥ यस्य मंत्री सुराचार्यः सेनिका अमराः सदा ॥३३॥ क्षीरां
भोधिसमुद्भूतो वाहनं श्वेतकुंजरः ॥ तथैवोच्चैःश्रवास्तु गस्तुरंगः

म॰ मा॰
॥११॥

सुरसेवितः॥३४॥दुर्गस्त्वर्गः कल्मशारवीभौरिकः कुसुमायुधः॥संभेदजनन
को दूतः परिघायुध मुत्तमं॥३५॥ताभ्यांयुद्धेजितः सोपिकथनीयंकिम
स्त्विनः॥वेत्सिसर्वंत्रिकालज्ञ य द्वृत्तंदेवकेशव॥३६॥श्रीनारायणउवाच
॥३७॥विख्यातावसुरौघोरौब्रह्माराधनतत्सरौ॥तपःप्रभावेनतयोरजे
यत्वमभूत्तदा॥३८॥महेश्वरमृतेतौनोभवेतांमृत्युगोचरौ॥३९॥वयंयूयं
च कैलासंगमिष्यामो द्विजोत्तमाः॥तत्रविज्ञाप्यतंदेवं हन्मस्तौमणिम
ल्लकौ॥४०॥३४॥इतिश्रीब्रह्मांडपुराणेक्षेत्रखंडेश्रीमल्लारिमाहात्म्ये
वैकुंठाभिगमनंनामतृतीयोध्यायः॥३॥ ॥सनत्कुमारउवाच॥१॥

॥११॥

ततस्तेमुनयःसप्तनभोमार्गानुगामिनः॥ददृशुश्चंद्रशुभ्रांशुंकैलासंगि
रिशालयं॥२॥चंद्रकांतोपलैःशुभ्रैःसंजातामलशेखरं॥किंवाकर्पूर
पूरेणपूजितंधवलोज्वलं॥३॥उतवामौक्तिकंचूर्णंतेनप्रावरणीकृ
तं॥अमंदचंदनस्यंदसुस्नातमिवनिर्मलं॥४॥सारिताराजतीपिच्छैः
किंवातस्यामलत्विषः॥पीयूषरससंधौतशिखरालिसुशोभितं॥५॥
यत्रस्वप्रतिबिंबानिदृष्ट्वागहनकुंजराः॥प्रमत्तादंतकुलिशैर्जघ्नुःसानू
निलीलया॥६॥विचेरुःस्फुरगास्तुंगाःकौमुदीमहसोज्वलाः॥उपत्य
कायामिवतेसमीरामूर्त्तिधारिणः॥७॥सिद्धामृतस्यकुंडानिकल्म

म॰ मा॰
॥१२॥

वल्लीवनाश्रये ॥ कल्पभूरुहशाखाग्रच्छायाच्छन्नानि सर्वतः ॥८॥ चंद्रकांत
शिलासंघबद्धसोपानकाध्वनी ॥ कस्तूरीहरिणाश्चेरुः कर्पूरकदलीवने ॥
॥९॥ चंचत्कांचनरंभासुस्वर्णवर्णफलोत्कराः ॥ आचकर्षुः स्वपाकस्य दृशा
या जगतो दृशः ॥१०॥ घनैः फलैरिवानम्रा मातुलिंग्यः सकंटकाः ॥ बभु
र्घनकुचाक्रांताः संभोगपुलकांकिताः ॥११॥ फलोपहारं क्रमुकाः प्रयच्छं
तीह वर्धिताः ॥ सुरवर्त्मनि सूर्याय प्रोन्नतास्तेन ताइव ॥१२॥ नागव
ल्यं चलप्रासनारिकेलफलोत्कराः ॥ एलाकंकोलवल्लीनामामोदः प्रसर
लं ॥१३॥ सदाफलरसालानां पाकवंति फलानि च ॥ सिंदूररंजितानी

॥१२॥

वविरेजुःपरितोदिशं॥१४॥सेविनांतापदलनाभुजंगावल्लिभूषणाः॥शिवाइ
वशिवोल्लासाविबभुश्चंदनद्रुमाः॥१५॥वनकुंजरकंडूतिकर्मणाभ्यस्तशा
खिनांदेवदारुतरूणांवैगंधःशैलेससारन्च॥१६॥तमालतरुखंडानिजीमू
तपटलान्यपि॥अविभक्तविवेकानिबभूवुस्तत्रचूलके॥१७॥मंदारतरुशा
खाग्रकुसुमानिसुयोवनाः॥श्चिंन्वंतिचंचलापांग्यःपार्वत्यायत्रसेविकाः॥
॥१८॥पार्यातकपरागोघपुंजपिंजरितस्तनाः॥हरंतिवनपालानांमुनीनां
कन्यकामनः॥१९॥रामाकटाक्षसंमग्नःकृष्णचंदनचर्च्चितः॥खाबभौचू
ततरुःप्रफुल्लःषट्पदान्वितः॥२०॥उत्फुल्लपुष्पनम्राणांनिधानानीवतेजसां॥
स्वर्णचंपकवृक्षाणांराजंतेरत्नवेदिकाः॥२१॥प्रतिबिंबितचूतानांफलौघान्त्र

त्नसानुषुश्रुकामोघोद्यमाय्रासेअहोनिर्धारणात्फलं॥२२॥शैवानांशिवपूजा
सुनिकुंजेषुदिवानिशं॥भवंत्योषधयोदीपायत्रतैलादिवर्जिताः॥२३॥चंद्र
कांताश्मशिखरेचंद्रमंडलवासिनः॥चेरुःकुरंग्यःसर्वत्रकुरंगस्यनिजे
च्छया॥२४॥कांतांगसंगसंजातपुलकस्तनमंडलाः॥किंनर्योमरवक्षा
ध्वःशैवंगायंतिसद्यशः॥२५॥गीताकृष्टमृगीणांचलोचनानिस्वलोचनैः॥
उन्मेनिरेविनोदाययत्रविद्याधरांगनाः॥२६॥सपुष्पाणांद्रुमाणांचमंदः
परिमलंवहन्॥निर्वापश्रमवतःपांथान्वासंतिकोमरुत्॥२७॥खेलं
तिमुष्टिभिःसिद्धबालिकारत्नसंयुतैः॥समासमविभागेनच्छायेत्रिदशा

वीरुधां ॥२८॥ रेमिरे सलिलक्रीडां यत्र किंपुरुषांगनाः ॥ वापीषु कांतसहि
ताः स्वर्णसोपानपंक्तिषु ॥२९॥ माणिक्यसानुगहेषु कांतगंडस्थलेषु
च ॥ रूपं विलोक्य गंधर्व्यः स्पृशंति दशनक्षतं ॥३०॥ किराता ददृशुर्मा
मार्गि सिंहानां करिमर्दिनां ॥ मुक्तावमद्भिरतुलैः पदैः शोणनखांकु
रैः ॥३१॥ चंद्रश्चंद्रोपलस्पर्शजलस्खलन्नदीतटे ॥ अमरत्वप्रदानां च
कंदानामुद्गमोभवत् ॥३२॥ अधित्यकासु तुंगासु चमर्यश्चारुदर्शनाः ॥
विचलंति चलच्चंचच्चामरक्षेपविभ्रमाः ॥३३॥ वृंदानि कामधेनूनां
हरिचंदनकानने ॥ आसीनानि घनच्छाये रोमंथान्यत्र कुर्वते ॥३४॥

म॰मा॰

॥१४॥ सुवर्णवर्णाः कपिलाः कश्चिन्मरकतत्विषः॥ कश्चित्कर्पूरपूराभा गा
वो रेजुश्च भूमयः॥३५॥ स्मरंतो न नृतुः प्रावृट्कालं समदकेकिनः॥ य
त्र वल्लीतरुस्मेरकुसुमासवसिंचनैः॥३६॥ शुका इव वृथालापान्कीरा
हंसाश्च कोकिलाः॥ चक्रिरे सद्विजाश्चांन्ये चूतचूलाग्रनिश्चलाः॥३७॥
समाधिशांतहृदयरंहसस्तापसा भुवि॥ निश्चला इव कुंजेषु मैहेश
लिंगरूपिणः॥३८॥ सालक्तकपदन्यासैर्व्रजंतीनां प्रियांतिकं॥ पूजा
वानिव रक्ताब्जैः शैलोभूत्सिद्धयोषितां॥३९॥ विकचेषु रसालेषु म
करंदप्रवर्त्तिषु॥ काकलीचंचरीकाणां जहार यमिनां मनः॥४०॥ तं द ॥१४॥

ष्ट्वा शैलममलं विमलीकृतमानसाः ॥ सभामालोकयांचक्रुश्चक्रिणा योजि
ता द्विजाः ॥४१॥ इति श्रीब्रह्मांडपुराणे क्षेत्रखंडे श्रीमल्लारिमाहात्म्ये कैला
सवर्णनं नाम चतुर्थोऽध्यायः ॥४॥ ॥सनत्कुमार उवाच ॥१॥ ददृशुस्ते सभां
शंभोर्याकृता विश्वकर्मणा ॥ शिलाभी रत्नरूपाभिः कांचनाद्यैः सचंदनैः ॥
॥२॥ लसत्सिंहावली यत्र रचिता प्रथमास्तरे ॥ ततः किंनरपत्रालीततो
युध्यद्गजावली ॥३॥ ततस्तु रंगपंक्तिः स्यात् पत्रवल्लीविलासनं ॥ ततः
कमलबंधश्च रत्नबंधस्तथोपरि ॥४॥ निस्तलान् शोपललितान् सो
मकांतमयास्तरान् ॥ निर्माय ससरचिताश्चंचत्कांचनभूमिकाः ॥५॥

म॰भा॰
।।१५।।

मुक्तासुधाध्यवलिताभित्तयस्फटिककुट्टिषः।।माणिक्यबद्धसोपानमार्गाःशुंड
द्वयांकिताः।।६।।इंद्रनीलोपलिस्तंभोपलिस्तंभारविभ्रभाःपद्मरागकृतोत्ता
लकुलिशाग्रहणानिच।।७।।जात्यप्रभापुष्परागचतुःपट्टिकसंवृताः।।दंडाः
श्चंडाश्वंडाश्चवृषखंडैर्विनिर्मिताः।।८।।पद्मरागशालौंभिर्वलभीयत्रशोभ का
ते।।इंद्रनीलकृताःसार्येमुक्ताःस्तबकसुंदराः।।९।।नीराजनकृतोद्योगाःसौ
वैर्णाःशालभंजिकाः।।कर्पूरपात्रविन्यस्तरत्नदीपानिरंतरं।।१०।।इत्यादिस
सभूमीनांशेखरेकनकोद्भवः।।कलशाःसूर्यतेजस्वीपताकांचलवीजितः।।
।।११।।यस्यांदेवगुरुर्वक्ताकविर्दैत्यगुरुःस्वयं।।सकलानांकलानांचज्ञाता ।।१५।।

विद्वद्विभुर्बुधः॥१२॥शिवस्यमान्यःशिरसासर्वज्ञस्यकलानिधिः॥जगन्नि
र्वापकत्वंहिगुणःसर्वत्रपूज्यते॥१३॥उपतस्थुर्महेशस्यदृगंचलमतंद्रि
ताः॥रूपवस्योणिमामुख्याःकिंकर्यश्चसिद्धयः॥१४॥मरुतोवसवोरुद्राः
सिद्धविद्याधरादयः॥कुबेरप्रमुखायक्षाहाहाद्याःसुरगायकाः॥१५॥
एकाग्रमनसोतिष्ठन्नारदाद्याःसुरर्षयः॥तुंबरुप्रमुखाश्चान्येगीतज्ञाः
परितोषकाः॥१६॥तिलोत्तमाद्यास्तारुण्यभरस्फारमदोद्धताः॥वीक्षंते
न्हसमयंसमुदायैर्निजैर्वृताः॥१७॥निधयःशंखपद्माद्याःकुंदाद्यामू
ते र्त्तिधारिणः॥सेवंश्शूलिनोदृष्टिंप्रह्वीकृतमनोंबुजाः॥१८॥इंद्रःसिंहा

सनासीनंस्वामिनंप्रणनामच॥सहस्रदृष्टिपातेनकराभ्यांजगदीश्वरं॥१९॥
ज्वालारोमांकुरःशीतइवशांत्याकुलाचलः॥उपतस्थेशिवंयत्ररूपधारीधनं
जयः॥२०॥दंष्ट्राकरालवदनःप्रज्वलद्वह्निलोचनः॥नमस्करोतिभूतेशंकृतां
तश्शांतमानसः॥२१॥विकोशाकरवालेनदिव्यमुष्टिश्चनैर्ऋतः॥प्रह्वीकृतद
शानिसमुपास्तेचंद्रशेखरं॥२२॥अंगणेपरमेशस्यसेकसंमार्जनादिकं॥
स्थीयतेकुर्वतादास्यंचरमाचलभूभुजा॥२३॥रजोहृज्जगतःप्राणःसभा
जिरगतःक्षणात्॥समरुच्चंद्रचूडस्ययत्रकिंकरतांगतः॥२४॥निधीन्स
र्वान्पुरस्कृत्यकुबेरोभूरिकीर्तिश्रियं॥आस्थायलोचनंशंभोःपर्युपास्तेसुभक्ति
मान्॥२५॥मार्त्तंडोचंडकिरणइवलोकसुखप्रदः॥सूर्याप्रसन्नयायत्रभा

जतेपार्वतीपतिं ॥२६॥ स्थितोपिशेखरेशंभोः कलयामूर्त्तिमान्शशी ॥ वृं
दवृंदारकाणां चसमयेसेवतेशिवं ॥२७॥ नंदयंतिसुराःकेचिन्निसंसदसि
शूलिनः ॥ स्वेदक्लांत्यपनोदायप्रलंब्यव्यजनानिलं ॥२८॥ सुगंधद्रव्यसंपूर्णाः
स्त्रिदशानांकरेस्थिताः ॥ तन्वंतिसौरभंधूमंज्वलंत्योधूपवर्त्तयः ॥२९॥ धा
रागृहगलद्धारिसीकराश्चंद्रिकोज्वलाः ॥ निर्वापयंतिसूर्याभ्योर्मध्यदेशे
स्थितान्सुरान् ॥३०॥ उत्तानानिसुरत्नानिदीप्तिमंतिमहांतिच ॥ वितान
स्थानिसुस्थानिजज्वलुर्यत्रसुंदरे ॥३१॥३०॥ इतिश्रीब्रह्मांडपुराणेक्षेत्र
खंडेश्रीमल्लारिमाहात्म्येचंद्रचूडसभावर्णनंनामपंचमोध्यायः ॥५॥ ॥

येनश्रुतेनभवतांदुःखोपहृतचेतसं॥ कलिकालाभिभूतानां
मानंदोजायतेहृदि॥ २

सनत्कुमारउवाच॥१॥दृष्ट्वातेब्राम्हणाःशंभोःसंसदंरत्ननिर्मितां॥विस्मयं
बकुलंजग्मुःकलावद्भिर्निषेवितां॥२॥ततस्तेभार्ग्यसंरंभैःसभायामस्त
यप्रदः॥दृष्टःकपर्दीभगवान्स्टपुध्वंतद्विजोत्तमाः॥३॥द्वात्रिंशासिं
हकलितेरत्नपंक्तिविराजिते॥जांबूनदसुवर्णेनघटितेनिस्तलेमले॥
॥४॥नानाप्रभासमाकीर्णेविद्युत्पुंजोज्वलत्विषि॥मरालगलतूलोघ
तूलिकोत्तरसुच्छदे॥५॥समासीनंशिवंसाक्षाद्ददृशुर्धर्मचक्षुषा॥ध
र्मस्यपुत्रास्तेसप्तपूर्वपुण्यफलोदयात्॥६॥कुंदेंदुचंद्रिकाचक्रकाश्मीर
महसांचयं॥पुण्यराशिमिवोत्तुंगमुत्तुंगस्फटिकोपमं॥७॥नानाचरि

त्रयशासामुच्छ्रयोपनतंशिरः॥क्षुब्धक्षीराब्धिकल्लोलमालास्नातमिवामलं॥
॥८॥गोक्षीरधामधवलंधवलांभोजपूजितं॥लेपितंचंदनेनैवकर्पूरपु
लकार्च्चितं॥९॥वीतरागानुरागाणांविराजेतेनिधीइव॥सरागेयस्य
देवस्यचंचच्चरणयोस्तले॥१०॥सर्वलक्षणसंपूर्णेलक्षणातिगतस्यच॥
आरक्तांभोजदर्पौघदलनेशोकसुंदरे॥११॥तमांसिमानसस्थानिवि
नयंतिप्रणामतः॥पादयोर्यस्यतौंनैंखचंद्रमहांशवः॥१२॥कालव्यालमे
मिषेणेवराजतेयस्यतोडरे॥विम्बग्रासोत्सुकःकालश्चरणेकटकाकृतिः॥
॥१३॥आसनंबद्धपर्यंकंस्वस्तिकंस्वस्तिदायकं॥सम्यकुविलोकमाना
नांशभोर्यस्यविराजते॥१४॥व्याघ्राजिनपरीधानंभुजंगेनदृढीकृतं॥

ध्यायतां कामदमनं देवानां यस्य सेविनां ॥१५॥ नाभिना सुंदरं तुंदं गंभीरेण
मनोहरं ॥ वलित्रयविलासैं यस्य विश्वावकाशकृत ॥१६॥ नाभिह्रदतटो न
ल्लासानंदवल्लीव सुंदरा ॥ यस्य हृन्मउपं यांती रोमराजी विराजते ॥१७॥ राज
तं निर्मितं यस्य सुविशालमुरस्थलं ॥ पार्वतीप्रेममंजूषाकपाटमिव राजते ॥
॥१८॥ त्रिशूलं डमरुं खड्गं पानपात्रं शरासनं ॥ खट्वांग बाणसहितं परशुं मृ
गमंकुशं ॥१९॥ दशायुधानि यस्यैवं विलसंति कपर्दिनः ॥ दोर्दंडेषु प्रचंडेषु
चंउाहिवलयेषु च ॥२०॥ आंभोरुहाणां पंचानामेकनाल इवासितः ॥ विभा
तिभक्तवात्सल्याद्यस्य कालगिलद्गलः ॥२१॥ प्रालेयशुद्धमीशस्य कंदर्पदह
नोद्यतं ॥ लोचनत्रितयं यस्य पश्चिमाननमुत्तमं ॥२२॥ गौरं सुतिलकं पां

डुगं डंप्रहसितंमुखं॥ ओत्तरंवदनंयस्यवक्रंकमलसन्निभं॥२३॥कल्मांतज्व
लनज्वालातडित्पुंजप्रभारुणं॥ इंउ गंगाजटासर्पैः पूर्ववक्रंविराजते॥२४॥
नीलजीमूतसंकाशंज्वलद्दंष्ट्रंसुभे रवं॥ सर्पप्रोतकपालालीशेखरंदक्षि
णंमुखं॥२५॥व्यक्ताव्यक्तंगुणातीतंसगुणंलक्षणातिगं॥ पंचमंवदनंयस्य
तडिन्मालाकुलंयथा॥२६॥यस्यदेवस्यवामांगसंगिनीतुहिमाद्रिजा॥ दि
व्यरत्नमणेश्वंचसप्रभेवप्रतिभातिया॥२७॥यस्यामंगलसूत्रस्यबलेनग
रलंपपो॥ कांतःकालबलोल्लीलंत्रैलोक्यगाससाहसं॥२८॥रतिकंदर्पयो
श्चित्तपम्रेरक्तांबराद्युती॥ नलेच्चरणयोर्यस्याःसानुरागेइवानिशं॥२९॥
मंजीरसिंजितंयस्याःपादयोर्बिरुदावलिः॥ वाग्विलासायतनुतेनिजां

माधुर्यतामिव॥३०॥ बंधूकपाटलारक्तदाडिमीकुसुमोपमं॥ उवासवसनं
देवीयासंध्यारागसन्निभं॥३१॥ पीनोत्तुंगे कुचतटे कंचुकं कांचनप्रभं॥
भांडागारमिवोत्तानं यस्याः कंदर्पभूभुजः॥३२॥ ग्रीवाविलासललिताराज
तेमौक्तिकावलिः॥ सौंदर्यसूत्रं कंदर्पवदनस्तनयोरिव॥३३॥ नानार
त्नसमुद्भायविस्फार्यकिरणावलिः॥ यस्याग्रैवेयकं भाति निधानमि
वतेजसां॥३४॥ यस्याः कनकताटंकनेमिमुक्ताफलानि च॥ अनंगव
क्रनिपतन्मनांसीवयतात्मनां॥३५॥ वदनेमदनोल्लासान्यस्याः कलयि
तुंशिवः॥ नयनानीवबहून्येवबभारजगतांपतिः॥३६॥ बिंबेयदिस्या
च्छशिनोनीलोत्पलदलद्वयं॥ तदोपमानयनयोस्तस्याःश्चारुचक्षुषः॥३७॥ स्या

यदिशौक्रस्यबिंबस्यकनकांभोजमासनं॥भवेन्नासामणेस्तस्याःसाद
श्यंचंपकत्विषः॥३८॥मुखचंद्रामृतस्यैवधारादंतोच्छलत्विषः॥यस्याः
शिवन्चकोरायराजतेधरपल्लवः॥३९॥उत्तरंगैरिवाकीर्णकालिंद्यानीलि
मावृतं॥यस्याःकटाक्षविक्षेपैरभूत्भ्रांतिदिशांनभः॥४०॥अष्टमीचंद्रस
दृशंललाटंप्रतिभातितत्॥ज्याबद्धकार्मुकाकारंयस्याःकुसुमधन्वि
नः॥४१॥मालतीकलिकागर्भेर्गुंजितैर्भ्रमरावली॥लक्ष्यतेलक्षणोपे
तैर्यस्याश्चिकुरपंजरे॥४२॥अगाधेस्मिन्सुधासिंधोगंगेवैकमुखी
शिवा॥शिवेमिलद्रसमयीरोमांचैःपुलकांकिते॥४३॥विद्याविद्या

ध्यरैर्वैद्यादेवानामधिदेवता॥जगन्मदिरनिर्वाणस्थाणोर्याशालभंजिका॥४४॥
याचैतन्यकलाविश्वरूपिणःपरमेशितुः॥ निसासस्यास्वयंमायामोहिनीली
लयाशिवा॥४५॥तयान्वितंशिवंदृष्ट्वाकृतकृत्यामुनीश्वराः॥पेतुस्तदंडवद्भू
मौबाष्पपूरितलोचनाः॥४६॥उत्थापिताभृंगिणातेपृष्ठाः केयूयमिसपि॥
विप्राःप्रवेशिताःस्वर्णवेत्रहस्तेननंदिना॥४७॥ ॥इतिश्रीब्रह्मांडपुराणे
क्षेत्रखंडेश्रीमल्लारिमहात्म्ये शिववर्णनंनामषष्ठोध्यायः॥६॥ ॥सनत्कुमा
रउवाच॥१॥कथंतेमुनयःसप्ततंदृष्ट्वागिरिजापतिं॥स्तोत्रंप्रचक्रुःप्रके
णभावेनजगतांविभोः॥२॥ऋषयऊचुः॥३॥नमोस्तुतेमहादेवनम

स्तेजगदीश्वर॥ नमोस्तुतेजटाजूटसंराजच्चंद्रभूषण॥४॥ नमोरुद्रायमहतेनम
स्तेगिरिजाप्रिय॥ नमस्तेजगतांनाथनमस्तेभक्तवत्सल॥५॥ नमस्तेदेवदेवेश
नमस्तेलोकपालक॥ नमस्तेजगदाधारनमस्तेवरदेश्वर॥६॥ नमस्तेभूतभ
भव्येशनमस्तेशूलभावन॥ नमस्त्रिपुरहर्त्रेथनमस्तेत्रिदशेश्वर॥७॥ नमस्ते
स्तुज्ञानदात्रेनमस्तेनागभूषण॥ नमस्तेवेदविदुषेनमस्तेवेदधारिणे॥८॥ न
मस्तेभूतदमननमस्तेसुरमर्दन॥ नमस्तेजगदाधारनमस्तेजगतांप्रिय॥९॥
नमः पिनाकहस्तायनस्तेकृत्तिवाससे॥ नमोऋषिगणाध्यक्षनमस्तेमुनिसत्प्रि
य॥१०॥ नमस्तेमुनिपालायनमस्तेमुनिसंश्रय॥ नमस्तेवरदेशायनमस्तेध
र्मपालक॥११॥ नमस्तेधर्मकर्तॄणांमार्गदेशकरप्रभो॥ नमस्तेसुतपःप्राप्य

नमस्तेतापसप्रिय॥१२॥नमस्तपोनिधौयतपःपालायतेनमः॥सृष्टिस्थितिविना नोति
शानांकर्त्रेतुभ्यंनमोनमः॥१३॥सभामध्यगतान्दृष्ट्वा विक्लवीकृतचेतसः॥उ
वाचब्राह्मणान्शंभुःकेनयूयंसुदुःखिताः॥१४॥ऋषयऊचुः॥१५॥मणिमल्लो
महादैत्यौमणिशैलाधिवासिनौ॥ब्रह्माणंतपसाराध्यतावजेयत्वमागतौ॥१६॥
नवध्यौपंचवक्त्रेणचतुर्वक्त्रेणवाक्वचित्॥षण्मुखेनदशास्येनदशबाहुव
तापिवा॥१७॥सहस्रबाहुनावापिदेवधुर्येणकेनचित्॥राक्षसेनापिमनुजैः
सिद्धविद्याधरादिभिः॥१८॥वरदानबलोन्मत्तौदुर्मदौदुष्टमानसौ॥ताभ्यांमही
तलेराज्यंक्रीयतेलोकपीडनं॥१९॥याभ्यांबिभेतिशक्रोपिनृपाणांतत्रकाक
था॥ऋषीणामाश्रमाःसर्वेविध्वस्तास्तेनपीडिताः॥२०॥उन्मूलितानि

लिंगानि स्वयंभूनि विनोदतः ॥ जलतीर्थेषु रम्येषु विचेरुः कुंजरास्तयोः ॥२१॥
तयोरनुरैः स्वर्गाल्केशाकर्षणविह्वलाः ॥ देवासुरविलासिन्योऽभुक्ताः प्रापय्य
भूतलं ॥२२॥ पानकेलिविलासोर्हेमपात्रं मरुत्वतः ॥ आनीतममरावत्या य
मेनकाख्यं मनोरमं ॥२३॥ प्रसहं नंदनोद्यानात तुष्ट्यै कुसुमानि च ॥ पा
रिजातस्य मघवाग्रस्छापयति तद्भयात् ॥२४॥ आसवाय घटीर्बद्धास्तद्द्
स्यैः कल्पशाखिनां ॥ दातव्यं कल्पितं तैर्हि सुहृदुष्टमथापि वा ॥२५॥ निक्षे
पितः सुरमणिः कंचित्कालं मरुत्वताभंक्षारवाचवैकुठं सुराणां सुरभिर्य
यो ॥२६॥ पीयूषरसपूर्णानि स्वर्णवर्णानि निसशाः ॥ अस्यर्पयति सूत्रामा

श्रीस्याभीष्टाफलानिच॥२७॥यत्किंचिन्नाकलोकेस्मिन्नपूर्ववस्तुसुंदरं॥भो
ग्यंतयोर्विभोगायशक्रःप्रापयतिक्षणात्॥२८॥अग्निस्तयोःप्रतापेनदा
हभीतइवानिशं॥सकंपमानहृदयःस्वपुरीमधितिष्ठति॥२९॥विश्व
संहाररसिकःकृतांतःशासनात्तयोः॥नबिभर्तिकरेदंडंचंडविक्रममंड
लं॥३०॥कोणेशःकोणपोजातिमात्रभावेनगोचरः॥दानादानादिकंप्रेम
तनुतेसततंतयोः॥३१॥वरुणोवारुणीभ्रांतइवभीत्येववेपते॥शिरसा
वंदतेसम्यकृतदादेशश्चिवेष्टितं॥३२॥सर्वदासर्वगोवायुस्तत्कांतासुरत
श्रमान्॥हरतेस्वल्पभावेनभयात्कार्यमुपागतः॥३३॥संप्रायतियक्षेशः

श्रीसेवभयगर्भया॥नसगीतेषुचतुराःकामिनीरलकापुरात्॥३४॥माणि
क्यदीप्तिरत्नानिचिंतामणिसमानिच॥ददात्यब्धिःकिमाश्चर्येययोरिंद्रो
पिसेवकः॥२५॥तपोव्ययभयाद्देशान्नशापंतिमुनीश्वराः॥श्रुनिदंउद्दते
शौचहहनिःकिंनैवजायते॥३६॥तयोर्मुख्यस्तुमल्लाख्यःसमदोतिप्रताप
वान्॥आश्रमान्नःसमभ्येत्यनानाडुःखंतदाकरोत्॥३७॥सर्वज्ञःसर्वदर्शी
त्वंयद्वृत्तंनोनवेत्सिकिं॥सर्वथापीडितास्तेनवयिस्वामिन्यनाथवत्॥
॥३८॥कथयामःकथंदेवज्ञातात्वंदोषदंडयोः॥तेषामितिवचःश्रुत्वा
शिवोवचनमब्रवीत्॥३९॥महताब्राह्मणाडुष्टकर्मणाभिगतायुषा॥

म॰मा॰ भग्नास्तेनमनोरम्यारुद्रहंसस्यपंजराः॥४०॥प्रध्वस्तामममल्लेनकालसर्प
॥२३॥ स्यपेटकाः॥विभ्रालोल्यवशेनेवमुषकेणक्षतायुषा॥४१॥दैत्याधमंग्रसा
मीतिसाट्टहासंसमुत्थितः॥जटाःसंत्राटयामासफटाटोपाहिनाभुवि॥
॥४२॥अजायतमहामारीदीप्तदावानलप्रभा॥सिक्तातैर्मुनिभिर्दीप्ति
रोषोत्कर्षेणसर्पिषा॥४३॥ततःसाघृतमारीतिनामधेयमुपागमत्॥
दंष्ट्राकरालवदनाजिह्वाललनभीषणा॥४४॥नानायुधधरात्युग्रा
शतभैरवनादिनी॥ज्वलच्छिखेवकल्पाग्नेर्वर्धिताभुवनत्रये॥४५॥
॥४२॥ ॥इतिश्रीब्रह्मांडपुराणेक्षेत्रखंडेश्रीमल्लारिमाहात्म्येशिवविज्ञा ॥२३॥

पनंनामसप्तमोध्यायः॥७॥सनत्कुमारउवाच॥१॥श्रृणुध्वंब्राह्मणायू
यंकलिसंतप्तमानसाः॥कलौसिद्धिप्रदंनृणांभक्त्यायत्स्वल्पयापिवा॥
॥२॥मार्तंडभैरवंरूपंबभारसहसाविभुः॥महाहिवलयोत्तर्यंचंद्रमा
र्तंडकुंडलं॥३॥डमरुत्रिशूलसहितंखड्गपात्रसुशोभितं॥तप्तकांच
नसंकाशंमुंडमालाविभूषितं॥४॥माणिक्यपंक्तिसदृशादशनावलि
शोभितं॥खंडेंदुसेखरत्र्यक्षंमहामुकुटमंडितं॥५॥वसंतखेलनोद्धू
लद्रजनीचूर्णगुंठितं॥६॥तापिच्छच्छविपिच्छालीचलच्चामरवीजि
तं॥उत्तुंगस्तनसंभारतरुणीकरपल्लवैः॥७॥क्रुध्यमानमहारावसा

म॰मा॰
॥२४॥

रमेवसमाकुलं॥सत्यकोटिगणाकीर्णपिशाचावलिपालकं॥८॥एवमास्था
यतद्रूपंतेजसातीवभावसुरं॥सूर्यकोटिप्रतीकाशंचंद्रकोटिसमप्रभं॥९॥
आदिदेशासुरान्सर्वान्निर्यातसमरोद्धुराः॥१०॥शस्त्रैरस्त्रैःसमायुक्तावाह
नैःस्वैरलंकृताः॥सन्नाहैर्वज्रकवचैस्तडिद्दीप्तिसमप्रभैः॥११॥अथतेत्रि
दशाःसर्वेनिजसेनाभिरावृताः॥सैनिकाःसमरानंदसंदोहैर्मेदुराययुः॥१२॥
उपत्यकासुकैलासगिरेःसुसमभूमिषु॥तेषांसेनाःपृथक्स्वामीदर्शि
यामासशूलिनः॥१३॥आरूढस्यवृषस्कंधेक्रोधज्वलितचक्षुषः॥मायू
रचामरस्फारप्रभामुकुरशोभिनः॥१४॥शुभ्रांशुमंडलाकारधवलच्छत्र ॥२४॥

सेविनः॥श्राकूश्रतापयशःपाठिबंदीजननुतस्यच॥१५॥स्कंदउवाच॥१६॥म
यूरवाहनादिवशक्तिकुंतायुधोद्यताः॥उसन्नीलसन्नाहावीरास्तेममसैनि
काः॥१७॥आदिगंतंगजारूढास्फूर्जत्कुलिशशोभिता॥शोभतेपल्लवछ
त्रैर्दैवेंद्रस्यचमूरियं॥१८॥गतेर्विलासंकुर्वंतितुरंगाःसादिनोदिताः॥
मनोरथमयंयत्रसासेनावज्रिणोपरा॥१९॥शक्तिशस्त्रज्वलद्दीप्तिर्वाहि
नीमेषवाहिनी॥दावदीप्त्याद्रिसंकाशादेवेयंजातवेदसः॥२०॥गलघंटा
लुलल्लोलनादसैरिभभासुरा॥प्रचंडोद्दंडदोर्दडासेनेयंशामनीविभो॥
॥२१॥दंष्ट्राकरालवदनंक्रव्यादबलमुत्कटं॥दर्पध्यारावलीखड्गंदेवेने

ॠतमास्थितां॥२२॥चंलसाशावलीहस्तावारुणीयमनीकिनी॥कुंकुमारुणना
सीराराजतिचंद्रशेखर॥२३॥ध्वजपल्लवसंछन्नासेनेयंतातवायवी॥
ध्वज्वायुधामहाघोरामर्मराभासुरारुणा॥२४॥चंचत्कांचनसन्ना
हाकांचनछत्रभूषिता॥स्वर्णोदग्रांकुशोर्भातिसेनेयंनारवाहनी॥२५॥यत्रों
उरुमुखावाहागजास्यायत्रसादिनः॥दीप्तांकुशकुठांश्रीलंबोदरश्चभूरि र
यं॥२६॥मृगास्यास्तुरगायत्रछत्राणिधवलानिच॥चामराणित्रभाचं
तिसाचांद्रीसबलाचमूः॥२७॥स्यंदनाःसप्ततुरगास्तडिन्मालोल्लसत्प्रभाः॥
उल्लोलछत्रसंकाशाहरिदश्वस्यसाचमूः॥२८॥हंसकांतिमयोत्तुंगा

स्तुरंगायश्च कुंजराः॥अक्षयोनेरियंसेनाकर्मंउलुरुसध्वजा॥२९॥नी
लमेघांजनच्छायसन्नाहाशंखचक्रिणी॥देवपीतांबरच्छन्नासेनागारुड
वाहनी॥३०॥शूलखड्गांगहस्तेयंगजचर्मपरिच्छदा॥सेनेयंशांभवीशंभो
लोचनत्रयभूषिता॥३१॥इतिदर्शयतिस्कंदेक्रोधान्मल्लवधोद्यतः॥मा
तॄंऽभैरवःशीघ्रंययौमणिमयाचलं॥३२॥चलंतिरौद्रवेतालाभूताः
प्रेताश्च डामराः॥शाकिन्योमातरोत्युग्रानानायुधकसोद्यताः॥३३॥
भ्रमत्खड्गहस्ताग्राः केचिन्मुसलपाणयः॥चलच्छक्तिकराःके
चित्केचित्परशुधारिणः॥३४॥त्रिशूलतूनोत्साहाःकेचिल्लांगल

पाणयः ॥ शोभिता मुद्गरैः केचित्केचित्तुंगगदाधराः ॥ ३५ ॥ केचिल्लोहार्ग
लास्कंधाश्चक्रचालनतत्पराः ॥ शंखचक्रभृतः केचित्कालदंडास्त्रमंडि
ताः ॥ ३६ ॥ केचिच्च शाबराभिल्लाः कुंतपट्टिशधारिणः ॥ धनुर्बाणधराः के
चिद्भिंडिमालाकरोद्यताः ॥ ३७ ॥ चर्मखड्गधराश्चान्ये खेटकुंता महाबलाः
मुद्गरान्भ्रामयंत्येके केचित्कंकणदंडकान् ॥ ३८ ॥ नाभिचुंबिप्रलंबोष्ठादं
ष्ट्रालंकृतवक्षसः ॥ केचिच्च पंचनयना व्याजंभास्याश्च केचन ॥ ३९ ॥ केचि
द्विस्तृतसिंहास्याः केचिद्वीराः षडाननाः ॥ शुंडानासावक्रतुंडास्त्रिशीर्षाः
सप्तशीर्षकाः ॥ ४० ॥ षड्सप्ताष्टकराः केचित्तू विलंबिहनुकुंतलाः ॥ ल

लटश्रृंगविकृताः केचिद्बालविलोचनाः ॥४१॥ केचिद्धूर्घरिकावक्त्रानाभिस्र
स्रसनांचलाः ॥ तिर्यक्कूर्चध्छटाटोपाजटाच्छन्नांगयष्टयः ॥४२॥ केचिदूर्ध्व
कराः क्रूराः केचिद्द्वीसविलोचनाः ॥ मुंडमालाधराः केचित्केचित्कर्णावि
ताननाः ॥४३॥ केचिदूर्ध्वपदः शीर्षकरयानामदोत्कटाः ॥ केचिन्नीलान
नाः केचिद्रक्तांगादंतुराननाः ॥४४॥ केचिद्दलंडभ्रूषांक्राघवलुःसत्वसं
भ्रमाः ॥ महामान्यामहोत्साहा महादेवात्मजा इव ॥४५॥ त्रिसप्तनववजि
ह्वाश्च पंचसप्तदशाधराः ॥ चतुःकर्णास्त्रिकर्णाश्च ज्वालास्याः पंचतुंदि
लाः ॥४६॥ वाद्यत्संग्राममसुरजाध्वनिनाद्यामपूरयन् ॥ रणडुंडुभयो

ढक्कानिःसाणाघनघोषिणः॥४७॥उद्घोषारणकंकालारणतालाःसुना
दिनः॥जयघंटादिवाद्यानियुगपद्ध्वनुस्तदा॥४८॥रेणुश्चरणमोह
र्येजुघुषुर्युद्धभैरवाः॥सस्वनुर्युद्धकांसोलाश्च क्कणूरणघोलकाः॥४९॥
तथापिनाकिवाद्यानिजगर्जुर्डिंडिमादयः॥ववडुर्दीर्घशृंगाणितस्तनुः
पटहादयः॥५०॥गगनंप्रावृतंभातिनानावर्णध्वजांचलैः॥शूलिनः
क्रोध्यवीरस्यवितानमितविस्तृतं॥५१॥शुभ्रैमूर्ध्वसुवीराणांचलद्भिः
स्वर्णदंडकैः॥चंद्रिकापूरितंव्योमतदाभूद्रजनींविना॥५२॥शिरःसु
रथिनातद्वत्करिस्कंधाधिरोहिणां॥चलन्मयूरकुंचानांदीप्याश्चन्य

मभूद्वनं ॥५३॥ ततः फणिफणारोपात्पृथिवी मज्जनोन्मुखी ॥ वराह
दंष्ट्रभंगाच्च चातुरंगस्य भारतः ॥५४॥ सेनाघोषेण क्षुब्धाब्धिः क्षुभि
तो मधुसूदनः ॥ तेन जागरयां चक्रे शेषपर्यंकलालितः ॥५५॥ जंग
मा गिरयो नीला इव धावंति कुंजराः ॥ महावदंकुशानुयानगणय्य
मदोद्धताः ॥५६॥ तत्र तेषामभून्मार्गे मदासारे स्तरंगिणी ॥ तां च ते
रुर्हयाः सादियुक्ता यच्चुद्धरंहसः ॥५७॥ क्षुभ्यद्वाहखुराघातैश्चूर्णी
भूतो मजं रजः ॥ घर्षणेश्चक्रनेमीनामस्पृशद्दिवमध्वनि ॥५८॥ इत्य
स्वल्पबलोपेतं देवं मार्त्तंडभैरवं ॥ विलोक्यानुचरा मल्लं कथयामासु

रासुराः॥५८॥५९॥ ॥इतिश्रीब्रह्मांडपुराणेक्षेत्रखंडेश्रीमल्लारिमाहा
त्म्येशिवसैन्यवर्णनंनामाष्टमोऽध्यायः॥८॥ ॥सनत्कुमारउवाच॥१॥
आथागतंमहेशस्यसैन्यंसर्वदिगंतरात्॥असंख्येयमनाख्येयंदीप्तशस्त्राव
लीरतं॥२॥इतितंकथयामासुर्दैत्यानामधिपेश्वरं॥मल्लुंतस्यासुरेंद्रस्यदूता
विभ्रांतचेतसः॥३॥मल्लउवाच॥४॥कोसौमहेशःकिंसैन्यंवृषभेणसमृद्धिमा
न्॥यस्यत्रावरणंभस्मभूषणानिभुजंगमाः॥इतिवित्तपतेर्वैरंरंकोयंकथय
त्यलं॥रेदूताहनतेनंहिविपरीतार्थभाषिणं॥६॥सुहृदाममतस्याद्रिःकैला
सोभुजपंजरे॥निध्यायांदोलितस्तस्यबलंमत्पुरतःकथं॥७॥अथासोलील ॥२८॥

योतिष्ठनुत्तुंगंशिखरंगतः॥तस्मादालोकयामासशंभोःसैन्यंसदेसराट्॥८॥त
दृष्ट्वांतर्भयोदैत्यःशूराणांदत्तवान्गजान्॥सुरार्दनायशूरायददावैरावतंगजं॥
॥९॥निर्जरध्वंसिनेवैरिसेनाकोलाँभिधं॥विद्युत्पातायशाकटंचतुर्वाजिवि हला
राजितं॥१०॥उद्धतायचमल्लायचतुर्दंतंमहागजं॥देवशल्यायवीरायददौ
सुरपतिंगजं॥११॥तस्मैचवाजीचित्रांगोदत्तःकाश्मीरसद्वपुः॥रत्नकांचनपर्या
णसंराजत्पृष्ठिमंडलः॥१२॥कुंजरंसैरिभास्यायहिमवंतंमहाबलं॥इंद्रगोप
तुरंगंचचतुश्चामरशोभितं॥१३॥सुरेंद्रदर्पदलनोबहूनांरक्षसांपतिः॥तस्मै
कर्पूरतिलकंवाजिनंचगजाधिपं॥१४॥चामराणिप्रभावंतिसन्नाहंस्तूर्यते

म॰मा॰
॥२१॥

जसं॥वैरिदर्पहरंखड्गंतांबूलंशशिनासह॥१५॥सुरग्रासायदेवारिंहस्तिनं
जयमंगलं॥अश्वंचंद्राश्रुसन्नाहंभल्लंनिजकरेस्थितं॥१६॥नरविध्वंस
कार्येभंकस्तूरीकवचाभिधं॥नंदनोद्यानदलनंकुंजरंचमहामदं॥१७॥वा
हैश्चतुर्भिःसंयुक्तंपद्मरागसमप्रभैः॥कांबोजैश्वंउकोपायरथंचविजयध्व
जं॥१८॥सिंधुनादायमत्तालिमालाव्याकुलिताननं॥प्राक्संग्रामेंहाशौ म
र्यपरितोषेणसिंधुरं॥१९॥इंद्रनीलप्रभावाहाःशिबिरंकनकप्रभं॥यस्य
तंस्यंदनवरंप्रायच्छद्रोसुरवायच॥२०॥यत्रसिंदूरवर्णाश्वाःश्यामकर्णा
मरुज्जवाः॥तंरथंधूम्रवर्णायगजंनीलगिरिंददौ॥२१॥उल्लसन्नीलम ॥२९॥

करंस्वर्णवर्णाश्वभूषितं॥कृष्णाध्वजंरथंश्शूर्पकर्णायव्यतरत्तदा॥२२॥ज्वा
लामुखःश्शूलजिह्वःसुरारिःसुरसूदनः॥करालःपावकाक्षश्चशक्तिदंतःप्र
तापवान्॥२३॥भीमाक्षोभीषणमुखोदेवमल्लोबुधांतकः॥निर्जरारिर्गजमु
खोरक्ताक्षखिदशार्दनः॥२४॥कालध्वंसीकुंभनासःसिंहपादोमरांतकः॥
खरराननःखररथःखररोमाखरांघ्रियुक्॥२५॥ऊर्ध्वकेशःसप्तबाहुर्न
ववक्त्रश्चतुर्भुजः॥हलदंतःक्रूरदृष्टिर्लिंगिलीकरभाननः॥२६॥वक्रदं
तःखरनखःखड्गकेशःसुराशनः॥असिजिह्वःकुंतजिह्वःकूर्मकर्णस्त्रिलो
चनः॥२७॥उदग्रास्योउर्मदश्चचामरश्मश्रुरुन्नतः॥व्याघ्रांघ्रिउर्धरो

म·मा· उष्ट्रःशूलरोमाविनाशिकः॥२८॥त्रिनासःसत्सरसनस्त्रिशिराश्चचतुः
॥३०॥ शिराः॥विद्युत्केशोज्वलद्दंष्ट्रोव्याघ्रवक्त्रःसुडर्मदः॥२९॥डुर्मुखःशारभाका
रःपविभासीब्रहज्जटः॥तडित्कर्णःक्रोधमूर्त्तिःपाशाकर्णःप्रमोदनः॥३०॥
सिंहनादःक्रूरनादःखरनादोश्वहेषितः॥शुंडाहस्तःकोशबाहुस्तडिद्दक्षा
स्त्रिपाद्बली॥३१॥नीलाननस्तित्तिरांगस्त्रिकर्णश्चंडविक्रमः॥श्वेतोदरः
शताक्षश्चधूम्राशीवीरखादनः॥३२॥सुग्रीवःशृंखलाहस्तःशूलग्रीवःशि
वारुतः॥क्रोधमूर्तिर्महामूर्तिर्निर्भोमूर्तिर्मदोत्करः॥३३॥इत्याद्यनेकदैत्यो ॥३०॥
घान्वाजिकुंजरश्चामरैः॥कर्पूरशस्त्रसन्नाहैःप्रियवाक्यैःसडक्तिभिः॥३४॥

वस्त्रालंकृतितांबूलैरर्हयामासतत्क्षणात् ॥ आदिदेशाततः सर्वांस्त्वर्यतां लघु
संगरे ॥३५॥ स्वयमारुह्य चोत्तुंगं सस्त्राक्षं महारथं ॥ सर्वशास्त्रौंसंपूर्णमंत्र स्त्र
यंत्रविधानवित् ॥३६॥ क्षणं मल्लासुरो दैत्यः स्तेजसा दीर्घितो बभौ ॥ निर्वा
णसमयं प्राप्तः प्रदीप इव उः सहः ॥३७॥ तद्धच्चमणिदैत्येशः कुंजरस्कंधला
लितः ॥ चलच्चामरवृंदानि यप्रदेशे लसंति च ॥३८॥ तत्सेनावाद्यनिर्घोषैः
क्षुभितास्तोयराशयः ॥ वेमुर्जलं तरंगालीमिषेण सहसा तदा ॥३९॥ उच्छल
त्तुंगसलिलप्रकाशाद्रत्नजातयः ॥ आलिलिंग हरेः कंठं लक्ष्मीर्दुग्धांबुधि
स्थिता ॥४०॥ आरक्तनीलपीताद्यैः छन्नैरापूरितं नभः ॥ सिंहनादैश्चदै

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्यानांप्रतिशब्दैर्महीभृतां॥४१॥शिखराणिजकुस्तेषांसहसावासलाल
साः॥उद्वेजिताश्चकिंन्नरास्तेसेनाघोषैर्दिवंययुः॥४२॥४०॥ ॥इतिश्रीब्रह्मां
डपुराणेक्षेत्रखंडेश्रीमल्लारिमाहात्म्येदैत्यचमूवर्णनंनामनवमोध्यायः॥
॥९॥ ॥सनत्कुमारउवाच॥१॥शृणुध्वंब्राह्मणाउष्टकलिकालमलापहं॥
न्विभंचरित्रंमल्लारेःश्रोतृणांसर्वसिद्धिदं॥२॥सप्तकोटिगणाकीर्णोदि
वोमार्त्तंडभैरवः॥तत्सेनाधिकसैन्येनमल्लोदैत्यःपरीवृतः॥३॥रोषेण
तेमहासैन्येमिलितेतुपरस्परं॥सिंहनादैश्चवीराणांभूतलंबधिरीकृ
तं॥४॥मिथोमकरतुंडानांसंघट्टैश्चशिरांसिच॥फेलुरुद्दोलयामासु

र्ध्वजानामुन्नतांचलाः॥५॥ललाटपट्टान्यभिलुन्कुंजराणांसमंततः॥आच
कर्षुर्महावंतःस्वांकुशैरंकुशान्मिथः॥६॥योधाःकुंतैश्चशूलैश्चताडयामासु
रद्भुतं॥स्वैरंकूर्चकचाक्रांत्याअन्योन्यमतुलोत्सवाः॥७॥शुंडादंडान्कुंजरा
णांनिजघ्नुःकरवालतः॥८॥नाडीर्वामकराग्रेणधारंधारंमहाशयः॥चि
खेलगोलैर्लीक्षायाःकालबालइवाजिगः॥९॥मिलत्कपोलनिनदैःकुंज
रैःकुंकुमारुणैः॥कल्मांतइवतत्रासीत्संग्रामेविश्वभीषणे॥१०॥टणत्कारे
श्चशस्त्राणांभीरूणांव्याकुलात्मनां॥११॥विचिकेरुर्विस्फुलिंगाःशस्त्र
संघट्टसंभवाः॥रणांगणेरजःकीर्णेखद्योताइवतेनिशि॥१२॥कुंजरस्कं

ध्यसंरूढाः कालसन्नाहसंवृताः॥ ववर्षुः समरे योधाः शस्त्रधारा इवांबुदाः॥१३॥
निजघ्नुः सादयः सादीन् भल्लैः खड्गैर्भुशुंडिभिः॥ चक्रिकामुष्टिघातैश्च घनकं
कणदंडकैः॥१४॥ आमुष्टियमदंष्ट्राणां प्राहारैर्दारुणैर्मिथः॥ अत्यासन्नतुरंगा
स्ते केशाकेशि महाबलाः॥१५॥ बाणैरुत्तमलोहाग्रैर्विविधुस्तुरगान्मिथः॥ र
थिनः सारथीन् रोषाद्रथिनस्तु रणोत्सवे॥१६॥ बभंजुः शूलशकटान् कृ
र्तिकाशतशोभितान्॥ धावत्पदातिवृंदानि पक्षैरावृतघोटकान्॥१७॥ भ
होपदातयः शूरा लोहसन्नाहसंवृतान्॥१८॥ ज्वलत्फलाभिर्भल्लीभिः कुंजरा
न्समराजिरे॥ धनुर्ज्यास्फालमुक्ताभिस्ताडयामासुरद्भुतं॥१९॥ तीक्ष्णशूलप्र
हारैश्च रथिनः सहघोटकान्॥ जीविताशां परित्यज्य प्रजघ्नुश्चक्ररक्षकान्॥२०॥

अक्षान्विघट्टयामासुःकुठारैरतितीक्ष्णकैः॥सोढारोस्त्रप्रहाराणांस्यंदना
नांपदातयः॥२१॥केचित्कांश्चिच्चमुसलैःस्थूलैर्लोहार्गलादिभिः॥समरेचू
र्णयामासुःप्रहाररुधिरारुणाः॥२२॥केचित्त्वद्धांगसंजातैर्घातैःशीर्षाण्य
चूर्णयन्॥तथानिष्काशयामासुर्बहिर्लोचनपिंडकान्॥२३॥कांश्चिदे
केहलाग्रैश्चव्याचकर्षुःपदातयः॥तांस्तान्निहन्युरपरेनिस्त्रिंशैरस्त्रचं
चुरैः॥२४॥केचिच्चक्राणिमुमुचुस्तीक्ष्णधाराणियज्जवाः॥विसस्रुस्ता
न्परेशस्त्रैर्नित्यंसंग्रामपंडिताः॥२५॥आफलंभल्लघातेननिर्गच्छंतिय
थातथा॥जघ्नुःकराभ्यांसुभटाःकांश्चिदेकेपरस्परं॥२६॥ज्वलन्निस्त्रिंश
संघातघातैःक्षुण्णांगयष्टयः॥परेषांघोणदेशस्थंसंरोषाद्रुधिरंपपुः॥२७॥

म॰मा॰ हाकेचिद्दूरुसंदेशापीडनादहरन्नसून्॥अन्येषांकोपबहुलाःपतिताह्यवनी
॥३३॥ तले॥२८॥उदग्रेरंकुशैरुग्रान्पराक्रमवतोद्विपान्॥बबंधुःपाशजालेन
विषयाइवयोगिनः॥२९॥सकृत्सलायमानांश्चसन्नाहानुद्यतायुधान्॥
केचिदुल्लोलयांचक्रुस्त्रिशूलाग्रेणभेदितान्॥३०॥सेहिरेपतितान्शीर्षेग
दाघातान्भ्रमप्रदान्॥धीमंतोदुर्वचांसीवतत्प्राणहरणेच्छवः॥३१॥हति
घातोच्छलच्छोणशोणितच्छत्रमंडलाः॥स्वामिसंतोषऋणिनोयुयुधुः
शस्त्रपाणयः॥३२॥सुरांगनाननैःपूर्णंददृशुर्भ्रांतचक्षुषः॥वीरामुद्गर
घातैश्चशतचंद्रंनभस्तलं॥३३॥प्रस्त्रराभिंडिमालात्याःसुवृत्ताघटि ॥३३॥

ताअपि॥ लेगुः परेषां हृदये कुशब्दा इव दौर्जनाः॥३४॥ कठोरुडुः कुठारैकधा
राद्वेधीभवद्वपुः॥ कीर्त्तेः पुण्यात्परं किंचिन्नास्तीति चावदन्नृभटाः॥३५॥ सि
तशस्त्रोच्छलद्रक्तपूरस्नातारणेभटाः॥ अवनीं शोभयामासुरुत्फुल्लाः किं
शुकाइव॥३६॥ मुष्टिप्रहारैर्युयुधुः कबंधा दिव्यचक्षुषः॥ स्वामिभक्तिप्र
भावस्य कः पारं बेत्ति तत्वतः॥३७॥ छिन्नकंठाः कुठाराग्रैर्नन्नृतुः सुभटा
रणे॥ गजग्रीवाधराः केचिद्रणेशाइव दुर्मदाः॥३८॥ रणे विशिरसो वीरा
उद्रुवुः खड्गपाणयः दोर्मूलावर्त्तमत्युग्रं दर्शयंतः स्वसाधनं॥३९॥ दर्पाडुर
सिसंछिन्नास्तिर्यग्यज्ञोपवीतवत्॥ तेभित्वामंडलंभानोः सुभटास्त्रिदि
वंययुः॥४०॥ पतिताः करिकुंभानां पतितानां रथोपरि॥ शृंगाररसनिर्मि

ग्नमानसाइवतेबभ्रुः॥४१॥नद्योबभूवुरस्त्रस्यशोणफेनावलीयुताः॥हया
नांरूप्यवर्णानांयासुहंसायितंगलैः॥४२॥कर्तरीभिःसमायुक्ताःपत्रैर्बाणा
विचित्रिताः॥तरंगालिषुलोलासुशफराइवरेजिरे॥४३॥तोमराणितरं
गंतियासुकूर्माइवोन्नताः॥शिरांशिहतवीराणांकमलत्वमुपाययुः॥४४॥
मांसाशकर्मनिरताःकृतकोलाहलारवाः॥इवभांतिमदोन्मत्ताःशाकिन्यो
वनदेवताः॥४५॥कुंजराणांतुरंगाणांयास्वंगाणिमहांतिच॥ग्राहतामाय
युःसद्यःश्चलंतिचवलंतिच॥४६॥जग्मुःशैवलतांयासुकेशपाशासुवि
स्तृताः॥केशाकेशिमिथोयुद्धेशीर्षेभ्योयेवियोजिताः॥४७॥आध्मात
जठरास्तासांतीरेतीरेविशेरते॥परान्नभोजनेस्तृप्ताब्राह्मणाइवतुं

दिलाः॥४८॥सद्यः शिवप्रभावेण गणा निपतिता अपि॥उत्तस्थुः स्वायुधै
र्युक्ता यथापूर्वं रणावनेः॥४९॥दैत्यानां सुभटाः सर्वे नोत्तस्थुः समरे हताः॥
आर्द्राइव मृदः पिंडाः प्राणहीना दिवं गताः॥५०॥तुष्टुवुः प्रमथाः सर्वे देवं मा
र्तंडभैरवं॥जयेति मुनयस्तोषादवदन्युगपत्तदा॥५१॥अवाद्यन् जयवा
द्यानि कुसुमानि दिवः सुराः॥ववर्षुर्ललितं गीतमगायन्सुरगायकाः॥५२॥
॥५०॥ ॥इति श्रीब्रह्मांडपुराणे क्षेत्रखंडे श्रीमल्लारिमाहात्म्ये दैत्यसैन्यवधो
नाम दशमोध्यायः॥१०॥ ॥सनत्कुमार उवाच॥१॥अथ स्वे निहते सैन्ये स
दैत्योमर्षपूरितः॥ध्मातनासापुटो मल्लः क्रोधाग्निश्वासयोगतः॥२॥वक्रि
कुंडेक्षणः कंपमानखड्गः सुभीषणः॥शीघ्रं नुदेति तुरगानुवाच निजसारथिं॥३॥

म॰मा॰
॥३५॥

ततःसेनाधिपोदैत्यःखड्गदंष्ट्रःप्रतापवान्॥सुम्यज्ञापयदीशंत्वंमल्लाख्यमसुरे
श्वरं॥४॥कियत्सैन्यमिदंदेवग्रासमात्रमिवाधुना॥नालंतवप्रकोपायतांबूलं
दीयतांमम॥५॥तवमूर्त्तःप्रतापोहंसंग्रामेजयनिश्चयः॥हंतावीरसहस्त्रा
णामेकाकीतंनवेत्सिकिं॥६॥मयितिष्ठतिदैत्येंद्रकथंत्वंयुध्यसेस्वयं॥क्षणं
स्थित्वाद्यभत्यस्यपश्यमेरणकौशलं॥७॥अथासौदैत्यराजेनखड्गदंष्ट्रःस
मीरितः॥स्वामिसन्मानतोषेणययौयुद्धायसन्मनाः॥८॥वाजिनांपंचभिर्ल
क्षैरथैस्तद्द्विगुणैःसह॥चतुर्गुणैश्चकरिभिर्गजारूढश्चशस्त्रवान्॥९॥वा
द्यडंडभिनिर्घोषसीधुपानस्फुरन्मदः॥कृतबंदीजनस्तोत्रश्चारुचाम
रवीजितः॥१०॥तमायांतंसमालोक्यसमादिष्टःषडाननः॥युध्यस्वेतिम

॥३५॥

हेशेन खङ्गदंष्ट्रेन सत्वरं ॥११॥ प्रसाद इत्युवाचेशं सेनया निजया वृतः ॥ अ
नेकशास्त्रयुक्तः स्वामी चातुरंगपरिवृतः ॥१२॥ मयूरपिच्छचमरैः सेवितः छ
त्रमंडलैः ॥ मयूरवाहनस्तत्र तस्थौ स समरांगणे ॥१३॥ आवयोः समरोद्य
स्यात्सेनाभ्यां किं प्रयोजनं ॥ युध्यस्वेत्यवदद्वाक्यं खङ्गदंष्ट्रः षडाननं ॥१४॥
बालस्त्वं शूलिनः सर्वसैन्येन किल रक्ष्यसे ॥ संग्रामाय ससैन्यस्त्वं नभटस्य
शरणा वयं ॥१५॥ याचस्व पोलिकां दुर्गानासाभ्यां जहि रेकफं ॥ नवनीता
दने शक्तः कथं युद्धाय वल्गसे ॥१६॥ उत्संगं याहि रे मातुर्मुंच मुंचाजिसंभ्रमं ॥ को
मलानि तवांगानि निर्दयाममभल्लयः ॥१७॥ इति तस्य वचः श्रुत्वा चुकोप सुतरा
मसौ ॥ विव्याध दैत्यं बाणानां सहस्रेणासिदंष्ट्रकं ॥१८॥ तेन ते खङ्गचापेन बाणाः छिं

नाःसुलाघवात्॥विव्याधन्चससेनान्यंबाणैःशतसहस्रशः॥१९॥बाणजालंस
मायातंवीक्ष्यासौपार्वतीसुतः॥शक्त्यानिवारयामाससभ्रमंत्याबर्हिणासनः॥२०॥
ततःसकुंजरारूढःशफरीव्याधलक्षितः॥जघानषण्मुखंबाणैरुच्चैस्छःसम
रेबली॥२१॥व्यर्थीकृतंमयूरेणसमुत्पत्यनभस्तलं॥संधानंतस्यदैत्यस्य
स्वामिनाधिष्ठितेनच॥२२॥संधानव्यर्थतांमत्वावीक्ष्याकाशेतथोन्मुखं॥ज
घानकेकिनंसद्यःशरेणसरुषंगले॥२३॥ततःकोपेनपूर्णोसावविध्यत्तस्य
कुंजरे॥मज्जत्कर्तरीपिच्छाग्रमर्धन्चंद्रेषुणालघु॥२४॥षण्मुखस्यधनुर्वं
शंक्षुरप्रेणाशुगेनच॥चिच्छेदभ्रान्ततंदैत्योध्वजंभल्लासिधारया॥२५॥र
त्नैर्विनिर्मितांस्तुगान्किरीटानाशुगैःक्षणात्॥षड्भिस्तद्विगुणैःकर्णकुंडलानी

षुजन्मनः॥२६॥व्याकुलीभूतचित्तोसौबाणजालैरभूत्तदा॥ततःकोपेनमह
तास्फुरद्दोर्दण्डभीषणः॥२७॥मुमोचशक्तिमत्युग्रांशतघंटावलंबिनीं॥क
ल्पांतज्वलनज्वालानिर्मितामिवदुर्धरां॥२८॥दैत्याधमसहस्वेतिसातेना
शुगवृष्टिभिः॥वार्यमाणापिहृदयेपततस्यचपापिनः॥२९॥विह्वलःश
क्तिघातेनमुमोचासून्मदोद्धतः॥पलायमानंतत्सैन्यंमारयामासुरेश्वराः॥३०॥
केचिन्मुसलघातैश्चसुतरांपीडितोरसः॥रक्तानिराक्षसावेमुर्दिग्भ्रांता
भ्रांतचक्षुषः॥३१॥परिघाघातसंभ्रांतमानसाराक्षसाःपरे॥आसन्नमर
मरणामूर्छामाययुस्तत्रसंगरे॥३२॥पतितानांचशस्त्राणांधाराभिर्गलि
तांघ्रयः॥केपिधावंतिसमरेभीरवस्तुपराङ्मुखाः॥३३॥पपुःस्वेदजलंके

न्विस्तुरंगाणांचदंतिनां॥भंगभीतित्रषाक्रांताःकोणपाजीविताशया॥३४॥
॥३३॥ ॥इतिश्रीब्रह्मांडपुराणेक्षेत्रखंडेश्रीमल्लारिमाहात्म्येखड्गदंष्ट्र
वधोनामैकादशोध्यायः॥११॥ ॥सनत्कुमारउवाच॥१॥हतेसेनाधिपे
तस्मिन्स्वसैन्येथशिवात्मना॥कोटीनांराक्षसांस्वामीहेमदंडैश्चचामरैः॥२॥
वीज्यमानोरथारूढःशस्त्रविद्याविशारदः॥उल्कामुखोमहादैत्यःक्रो
धेनरणमाययौ॥३॥वाजिनांलक्षविंशत्यारथानांकोटिभिर्युतः॥को
ट्यर्धकुंजरैर्युक्तोसंख्येयैःपदगैर्वृतः॥४॥तमालोक्यकृतोत्साहंसम
राभिमुखंशिवः॥गणानामधिपंदेवंनुनोदरथिनंतदा॥५॥दैत्येनाभि
हितःसोथकिंतेयुद्धेनबालक॥मधुराणिचखाद्यानिमोदकप्रमुखानि

च ॥६॥ कुमाराय सुखं गेहे खाद्यं शस्त्राणि संगरे ॥ स तेन व्याहृतः पश्चाद्धाचांलल
मलं तव ॥७॥ दैत्यसेनासुरक्तान्वो मोदकान्भक्षयाम्यहं ॥ शिवस्य बालको नू
नं भवतामंतकोधुना ॥८॥ इत्युक्तो राक्षसः कोपात्प्रज्वलद्दहनेक्षणः ॥ मुमोच
तीक्ष्णधाराणां शराणां शतमद्भुतं ॥९॥ तान्शरान्पर्शुघातेन गणेशो लील
याच्छिनत् ॥ संदध्ये सोत तो दैत्यः शराणां द्विसहस्रकं ॥१०॥ ते शरा वाजिनामं
गे केचिन्मग्नाः सपत्रकाः ॥ उन्मार्गगामिनोभूवन् हयाः सारथिनाहृताः ॥११॥
अक्षो बभंज मकरश्चूर्णीभूतोभवत्तदा ॥ हाहाकृतं सुरैस्तत्र तल्लज्जाकोपपू
रितः ॥१२॥ विव्याध तुरगांस्तस्य बाणैः सारथिनं ध्वजं ॥ तं च दैत्यं गणाध्यक्षो
विरथं प्राकरोत्तदा ॥१३॥ लोहभारसहस्रस्य गदां जग्राह दानवः ॥ भ्रमंती

तांकुठारेणचिच्छेदच्चगणाधिपः॥१४॥गृहीतुमुद्यतःशक्तिंयावत्क्रोधान्महा
सुरः॥तावज्जघानगणपःसदंतेनाशुमुष्टिना॥१५॥तावत्सनरसिंहाभूल्लिले
खनकरैःकरींतस्यदंतप्रहारेणप्राणान्जग्राहविघ्नराट्॥शिरोभिन्व्यात्त
नयनंलल्लज्जिह्वंचछछटं॥१७॥छिंनःपदातिघातेनपपातविशिराभुवि॥१८॥
विलोक्यतंहतंदैत्यंतत्सैन्यंयोद्धुमुत्सुकं॥अभूत्तस्यगणैःक्रोधाद्युद्धेनी
तंयमक्षयं॥१९॥तुरंगकुंजरमहारथिसारथिभिःसह॥२०॥अथतंसमरे
दृष्ट्वादीर्घनिद्रामुपागतं॥उल्कामुखंमहासैन्यंसमरेरविलोचनः॥२१॥अशी
त्यावाजिलक्षाणांरथैःकोटिद्वयेनच॥कुंजराणांचतुःकोट्याविसंख्येयैःप
दातिभिः॥२२॥अयुतेजयवाद्यानांसहस्रेणोच्चतध्वजैः॥स्वामिसन्मा

नदर्पणस्फुरन्नासापुटद्वयः ॥२३॥ स्फूर्जच्चंडभुजादंडः स्वर्णदंडैश्चवीजितः ॥
चामरैः कुंतलोमाख्यः संग्राममायसमाययौ ॥२४॥ तमायांतं शिवो वीक्ष्य दिदेश
जयनंदिनं ॥ प्राप्तवंतं महेशस्य सारूप्यं नागभूषणं ॥२५॥ त्रिनेत्रं पंचवक्त्रं च
चंद्रमुक्ताद्युतिप्रभं ॥ त्रिशूलादीनि शस्त्राणि दधानं चंद्रशेखरं ॥२६॥ कांच
नस्यंदनारूढं संग्रामोत्सवपीवरं ॥ तमुवाच शिवाकारं त्वं महेशोऽसि रे सुर ।
॥२७॥ तेनात्तं कृपया शंभोः स्वरूपं प्राप्तवानहं ॥ किंकरः शंकरस्याहं लब्धधा
र्थमुपागतः ॥२८॥ तमाह कुंतलोमासाव मरत्वं गतं लव ॥ रे रे दैत्यकुलांतोऽहं क
स्त्राता तच्च रक्षतु ॥२९॥ तमित्युक्त्वा ललाटस्य स्वेनेन ज्यां ममर्द च ॥ तत्र संधा
यबाणानां शतं लक्षत्रस्तुतिमत् ॥३०॥ आकर्णं धनुरापूर्य कुंतलोमा मुमोच

चतं॥खड्गांगचालनोच्छालैःशरांस्तान्सनिराकरोत्॥३१॥जयनंदीगणःशंभोर्ध
नुरादायसुप्रभं॥संदध्येबाणमत्युग्रंदिग्धंहालाहलेनच॥३२॥आपूर्यैरस्छला
स्फालंतेनदैत्यमताडयत्॥३३॥वार्यमाणोपिबाणानांशतैर्वक्षस्थलेपतत्॥
निर्गतेपृष्ठरंध्रेणबाणेमेनेनैव्यथां॥३४॥अथासौशरजालेनत्रासयामास स
नंदिनं॥ससैन्यंसमरेतत्रयुद्धमंत्रप्रभाववान्॥३५॥पराङ्मुखोभवन्नंदी
रथाश्वैर्वलितंक्षणात्॥सारथिःशरनिर्भिन्नःपपातधरणीतले॥३६॥ध्वनु
र्मुष्टियुतंसद्यश्चिच्छेदध्वजमुन्नतं॥तेनद्रुवरथेनाब्धिःक्षोभितोमुखनोद
नात्॥३७॥पलायमानंदेवानांसैन्यंचूर्णीचकारसः॥मर्दनैश्चक्रनेमी
नांस्वांगकुंताहतैर्गजान्॥३८॥घातयामासतुरगान्शस्त्रपातैश्चदारुणैः॥ ॥३९॥

एवं संक्षीयमाणेथ सैन्ये नंद्यवलद्रणे ॥३९॥ क्रोधेन पूरितः स्वांतः संवर्ताग्नि
विलोचनः ॥ अन्यसारथिनायुक्तः सिंहनादं चकार सः ॥४०॥ तेन सर्वं हतं
सैन्यं दैत्यानां शरवृष्टिभिः ॥ विव्याध कुंतरोमाणमाग्नेयेनाशुपत्रिणा ॥
॥४१॥ स पत्री शोषयामासामृतं तस्य हृदि स्थितं ॥ ततः स विक्लो दैत्यो
भ्रमच्चक्षुरभूत्तदा ॥४२॥ हते तस्मिन्दुराधर्षे श्रीमता जयनंदिना ॥ पुष्पा
णि मुमुचुर्देवा आशीर्वादानृषीश्वराः ॥४३॥४०॥ इति श्रीब्रह्मांडपुराणे क्षे
त्रखंडे श्रीमल्लारिमाहात्म्ये उल्कामुखकुंतलोम्नोर्वधो नाम द्वादशोध्यायः ॥
॥१२॥ ॥ ॥ सनत्कुमार उवाच ॥१॥ ततो हतेषु दैत्येषु सेनानीसैनिकेषु च ॥
यद्वृत्तं संगरे तस्मिन्श्रूयतां तदृषीश्वराः ॥२॥ मणिमल्लो रुषा पूर्णो रणवा

घमहोत्सवौ॥ तावुभावपि संग्रामे तिष्ठतां क्रोधनिर्भरौ॥३॥ उवाच भ्रातरं मल्लं म
मणिः क्रुद्धोद्धुरस्तदा॥ दैत्यराज महाभाग्योदयं मे पश्य संगरे॥४॥ यस्त्वयं ज
गतां नाथः शक्रादिसुरपूजितः॥ सयोद्धाद्य जयं तस्मिन् लभेवा न लभेथवा॥५॥
पराजयजयाभ्यां मे जय एव सुनिश्चितः॥६॥ इत्युक्त्वा सिंहनादेन जगर्ज म
णिकासुरः॥ त्रैलोक्यं पूरयामास सस्वशब्दप्रतिरावतः॥७॥ चेलुः कैलासशिख
रे बद्धसिद्धसमाश्रयः॥ दंद्वानां किन्नराणां च दृढान्यालिंगनानि च॥८॥ कंठं
मुरारेः कमलालिलिंगप्रतिशब्दभीः॥९॥ सिंदूरोद्धूलनशिरामायावीतुंग
मूर्त्तिमान्॥ लिखन् रत्नकिरीटस्य कोट्या वारिदमंडलं॥१०॥ शोभितोबा
हुविंशसारक्तचंदनचर्चितः॥ तडित्लक्षप्रतीकाश कर्णकुंडलमंडितः॥११॥

नीलमेघावलीछत्रःसर्वायुधलसत्करः॥जपाकुसुममालाभिर्दीप्यन्मूर्धभुजागलः॥१२॥
पदातिर्गिरिसारैःस्वैःपादन्यासैर्महीतलं॥पदेपदेविनमयन्योद्धुमभ्याययोरणे॥१३॥
तमभ्यागतमालोक्यश्रीमन्मार्तंडभैरवः॥प्रहसचारयामाससंग्रामायगणान्निजा
न्॥१४॥रेरेगणाःक्षणंयुद्धमीक्षध्वंखलुमामकं॥शौर्यंवीक्षामहेचास्यराक्षस
स्यतथाबलं॥१५॥बभूवभैरवस्तद्वसदातिःसमरेच्छया॥सिंहनादेनमहता
क्षोभयामासरोदसी॥१६॥तमुवाचमहादैत्यःकेनत्वमसिवंचितः॥भैक्ष्यया
श्वासदाश्रेयोभिक्षूणांसमरेणकिं॥१७॥श्रुत्वेतिवचनंतस्यत्रिनेत्रःक्रोधपू
रितः॥दुद्रावतंदुरात्मानंस्फुरन्नासापुटद्वयः॥१८॥लोहभारसहस्राणां
गदयाकाशतुंगया॥जघानमूर्ध्निसहसाजहौतांचसखेटकान्॥१९॥

अवीवदच्चयोद्धारंतुच्छंभैरवंतेबलं॥उत्तुंगोसिचपीनोसिनिःसारत्वान्महालघुः॥२०॥
तदाकर्ण्यवचस्तस्यपुनारोषान्मदोद्धतं॥जिहिंसबाणैर्वेगेनसहस्रप्रसवक्ष
मैः॥२१॥तानागतानूच्छरान्वीक्ष्यकरवालेनसोच्छिनत्॥सम्यग्जितेंद्रियोयो
गीचित्तेनविषयानिव॥२२॥ततःसराक्षसःक्रूरःक्षुरप्राणांशताधिकं॥सह
स्रंसंदधेज्यायांशराणामग्नितेजसां॥२३॥भस्मीचकारतान्बाणान्हुंका
रेणमहेश्वरः॥तमताडयदुग्रेणकिरीटेसमहेषुणा॥२४॥उज्जग्मुस्तत्रर
त्नानिखनित्रेणाकरेयथा॥अभ्यधावत्ततोदैत्यंसंहर्तुंभैरवःस्वयं॥२५॥
चंद्रहासेनतीक्ष्णेनरंहसास्यशिरोच्छिनत्॥तावत्संशरभास्योभूद्ध्व
जंशंभोर्ददंशाच॥२६॥ततःकर्त्तिकयाशंभुस्तंजघानस्वयंरुषा॥शस्त्रिं ॥४१॥

कांतांमुखेनैवजग्राहघुटिकामिव॥२७॥अथशंभुस्त्रिशूलेनछेदयामास
तंजवात्॥उरस्थलेपृष्ठिवंशेयथाभिद्यतितत्क्षणात्॥२८॥दैत्येशोथाश्व
वत्तुंगस्तुरंगवदनःक्षणात्॥चकारहेषामत्युग्रांजगत्क्षोभविधायिनीं॥२९॥
अर्धचंद्रेणबाणेनग्रीवांतस्याच्छिनद्धिवः॥तस्यस्यात्कौंजरीग्रीवाशुंडा
दंडविराजिता॥३०॥तांजघानकुठारेणतीक्ष्णधारेणमूर्धनि॥ततोसौ
तुरगारूढःसादीस्यादुग्रखरखड्गवान्॥३१॥निहन्यमानःशस्त्रौघैरुर्ध्व
रासौमहेश्वरं॥जघानकरवालेनभुजमध्येमदोद्धतः॥३२॥तेनभूषणना
गेंद्रःप्रहारेणचखंडच॥ततोमुमोचसहसावन्ह्यस्त्रंगिरिजापतिः॥३३॥स
तेनव्याकुलीभूतःपपाताश्वेनसंयुतः॥जलेयत्रतुरंगाख्यमभूत्तीर्थंसुपु

ण्यदं ॥३४॥ अथ नाराचतीक्ष्णाग्रैर्ब्रह्मांडं समपूरयत् ॥ दैत्यराजः शिवं लक्षी
कृत्य सर्वं निरंतरं ॥३५॥ अंगे तस्य शराः शंभोर्विश्वनाट्यनटस्य च ॥ लला
टपट्टे मुकुटे कपाले कुंडलद्वये ॥३६॥ भुजेषु वक्षसि क्रूरा लग्ना मग्नाः स
मं ततः ॥ स्कंधयोर्नाभिदेशे च ग्रीवास्कंधद्वयांतरे ॥३७॥ मुंडमालाशरैर्भि
न्नाः शंभोर्दैत्यस्य संगरे ॥ मृतस्य मरणं प्राप्तं महोत्राविधेर्गतिः ॥३८॥ भ
क्रुध्यं छर निर्भिन्नाः शिवभूषाभुजंगमाः ॥ दैत्येनामंत्रिताः काला इव रेजुः
फणान्विताः ॥३९॥ अह्नोच्चंद्रमाः शंभोर्जटाजूटमठस्लदा ॥ दैत्यराज
स्य बाणेर्हि वैरस्थानस्थितेः फलं ॥४०॥ अथ तं दुर्धरं दृष्ट्वा महावीरं मणिं
शिवः ॥ ज्वलज्ज्वलनसंकाशं शूलमुग्रं मुमोच ह ॥४१॥ तदाहतं परशुना

चक्रखड्गशरोत्करैः॥निवार्यमाणंदैत्येनप्राप्तंकर्मैवपूर्वजं॥४२॥तेनोरसिविनि
र्भिन्नस्त्रिशूलेनसदैत्यराट्॥पपातविह्वलोभूमौभ्रमल्लोचनपुत्रिकः॥४३॥
दातुंमूर्ध्निपदंशंभुर्यावदुच्चालयत्सहो॥दैत्येनपरयाभक्त्यास्थापितंनिजमू
र्ध्वनि॥४४॥कयास्यसीतिदेवेशवैरेणपरितोषितः॥दृष्टोस्यंतेरणेमृत्युस्त्वां
नमुंचामिसर्वथा॥४५॥निजशौर्येणसंतुष्टस्तुनावजगदीश्वरं॥दृष्टःसा
क्षात्कृपापात्रीभूतोसौदैत्यपुंगवः॥४६॥मणिरुवाच॥४७॥नमस्तेभूतना
थायसर्वांतर्यामिणेनमः॥नमोरौद्रायरुद्रायनमस्तेदानवारये॥४८॥न
मःशुद्धायशांतायकैवल्यपतयेनमः॥नमोरत्नावलीचंचन्मुकुटायासि
पाणये॥४९॥नमोदयासमुद्रायदेवदेवायशाश्वते॥नमोदेवायमहते

नमोगंगाध्रियायते॥५०॥नमःकमलकिंजल्कपुंजपिंजरतेजसे॥चंद्रचंचत्क
लामौँत्रिनेत्रायनमोनमः॥५१॥मयूरपक्षचमरवीज्यमानायतेनमः॥सस्को ले
टिगणाकीर्णसैन्यायशिवतेनमः॥५२॥नमस्त्रिशूलहस्तायनमस्तेत्रिगुणा
त्मने॥नमःपरमहंसायनमःपाक्षधरायते॥५३॥नमःकारुण्यपूर्णायन
मःस्तेस्वस्तिकारिणे॥नमोभक्तजनानंदविधाननिधयेनमः॥५४॥नमः
परमकैवल्यदायिनेविश्वधायिने॥डमडुमरुडंकारकारिणेतेनमोन
मः॥५५॥श्रीमार्त्तंडभैरवउवाच॥५६॥तुष्टोहंतवयुद्धेनमणेभक्त्याच
पूर्णया॥वरंवृणीष्वचित्तस्थंतुभ्यंदास्याम्यहंततः॥५७॥मणिकासु
रउवाच॥५८॥यदितुष्टोसिदेवेशाकृपयारिनिषूदन॥मत्कृतंयज्ञव

स्तोत्रममुष्य पठतान्नृणां ॥५९॥ जायेत लक््मीरतुला दानादिश्चोपकारि
णी ॥ सर्वभोगप्रदा पुत्रवाजिवारणसुंदरा ॥६०॥ मोक्षश्चांतरणे शौर्यं वाणी
नवरसोज्वला ॥ तुरंगसहितं रूपं मदीयं तव सन्निधौ ॥६१॥ श्रीमार्तंड
भैरव उवाच ॥६२॥ मणेर्दत्तं त्वया यद्यत्तत्ते भवतात् ध्रुवं ॥ त्वं याहि
परमं मोक्षं शाश्वतं मम शासनात् ॥६३॥ अत्र एव तामावयोर्युद्धं सिद्धयः
संतु सर्वदा ॥६४॥५८॥ ॥इति श्रीब्रह्मांडपुराणे क्षेत्रखंडे श्रीमल्लारिमा
हात्म्ये मणिकासुरवधो नाम त्रयोदशोऽध्यायः ॥१३॥ ॥सनत्कुमार
उवाच ॥१॥ अथ तुष्टो महादेवो मणेर्भक्त्या प्रसन्नधीः ॥ भ्राता तस्येति कृपया
मल्लं रक्षितुमिच्छति ॥२॥ उवाच विष्णुं देवेशं मल्लमाज्ञापयेति च ॥ तं गत्वाब्रू

हिपातालंयाहिशेषैर्जनैर्वृतः॥३॥भवंतुसर्वेमुनयःस्वाश्रमेध्ययनोत्सवाः॥
प्राप्नुवंतुसुराःक्ष्मायांप्रतिमापूजनानिच॥४॥संतुयज्ञक्रियाविघ्नानिर्व्या
कुलितमानसाः॥दीव्यंतुसर्वेराजानःपालयंतुमहीतलं॥५॥यज्ञग्रासभु
जोदेवाःसंतुत्रिदिववासिनः॥नोचत्वामधुनायुद्धेभैरवोयंहनिष्यति॥६॥
इतिशंभोर्वचःश्रुत्वादैत्यंराजंजगामसः॥एकाकीगरुडारूढोविशस्त्रः
शांतमूर्त्तिमान्॥७॥उवाचतंमहादैत्यंमल्लंमल्लेनपूजितः॥रणेक्षयमि
तादैत्याबहवस्तेतथाबलं॥८॥अन्येपिभ्रातरःपुत्राःसगोत्रामित्रबांध
वाः॥शालकाःश्वशुराःक्रूराःसेवकाहृदयंगमाः॥९॥प्रमत्तादंतिनः
प्रौढावाजिनश्चमनोजवाः॥अनर्घ्यरत्नघटिताःशक्तसारथिभिःस ॥५४॥

ह॥१०॥पदातयोप्यसंरब्धेयाभ्रातापिप्राणवल्लभः॥त्वयाघातयितायुध्देदुर्मदांधेनमल्लरे॥
॥११॥इदानींशरणंगत्वादेवोमार्तंडभैरवं॥शीघ्रंरसातलंयाहिशेषैर्दैत्यैःपरीवृतः॥१२॥
त्राणानवनिजान्मल्लक्रोधीमार्तंडभैरवः॥कल्पांतकेलिरसिकस्तेनयोद्धुंनचार्हसि॥
॥१३॥तस्यक्रोधानलेदैत्यमातेदेहाहुतिःपतेत्॥अत्ययेपिचसंजातेमापुनर्विष
भक्षणं॥१४॥प्रह्लादस्यकुलोत्पन्नस्तस्मात्वांयोजयाम्यहं॥हितायकृपयामल्लम
मद्वचःशृणुसर्वथा॥१५॥मल्लासुरउवाच॥१६॥भगवंस्त्वामहंयाचेतन्मेदेहिप्र
सादतः॥स्थातव्यमस्मिन्भवतायावद्योत्स्याम्यहंक्षणं॥१७॥तत्सैन्यंसशिवंवक्रे
जानीहिपतितंमम॥त्वांरक्षामियतःपूज्यःपूर्वजानांगदाधर॥१८॥स्थित्वा
स्यशिखरेतुंगेयुद्धंपश्यममेरिपुः॥१९॥शंभुनातद्गणैर्वापिभ्रातानासैन्यैःपरीवृ

तः॥गिलितस्त्वंक्षमृगयेप्रज्वलज्जठरानलः॥२०॥विदार्यजठराण्येषांतद्रक्ततटिनीषु
च॥नावगाहेभृशंयावत्तावद्दाहोनशाम्यति॥२१॥बुभुक्षितानिशस्त्राणिदेवशो
णितपानिमे॥तृप्तिंनयामिपरमांनयावज्जीवितेनकिं॥२२॥सुरदेहोच्छलद्रक्त
बिंदुसिक्तमिवांबरं॥यावन्नकुर्वेगोविंदसुखंतावल्लभेकथं॥२३॥भैरवश्च
गणास्तस्यकिंयोत्स्यंतिमयाहरे॥तृणानिपावकेनैवशुष्काणिबलवंत्य
पि॥२४॥अद्यनिस्त्रिदशःस्वर्गःपृथ्वीनिर्मानुषाद्यच॥रसातलंमनागोघं
कुक्षेमयिसुरांतके॥२५॥दंष्ट्राचर्वणनिर्घोषंनिर्जरान्मयिखादति॥भ्रात
शोकज्वलच्चित्तेनालंपानायसागगराः॥२६॥श्रीनारायणउवाच॥२७॥रे
मल्लशृणुमेमंत्रंवैतसींवृत्तिमाश्रय॥पतंगवृत्तौमरणंनीतिदोषास्पदंवृथा॥

॥२८॥मल्लउवाच॥२९॥निजप्राणभयात्केचित्सत्वंमुंचंतियेजनाः॥पच्यंतेकुंभि
पाकेषुनरकेषुसमाःशतं॥३०॥इत्याद्यनेकशपथान्कथयामासदैत्यराट्॥
शूराणांतृणवत्प्राणाःकृतनिश्चयिनांरणे॥३१॥२७॥इतिश्रीब्रह्मांडपुराणे
क्षेत्रखंडेश्रीमल्लारिमाहात्म्येविष्णोदैत्याभिगमनंनामचतुर्दशोध्यायः॥
॥१४॥ ॥सनत्कुमारउवाच॥१॥विष्णुनावार्यमाणोपिक्रोधाक्रांतःसदैत्य
राट्॥संग्रामायययौमल्लोजयवाद्यमहोत्सवः॥२॥सर्वशस्त्रास्त्रसंयुक्तः
सर्वमायान्वितोरथी॥हरिचंदनकस्तूरीकुंकुमागरुलेपनः॥३॥सिंदू
रेणुनिकरसंराजन्मूर्धजच्छटः॥आमेघमंडलतनुर्नीलजीमूतसन्नि
भः॥४॥रचितःकालकूटेनधात्राकिंकज्जलेनवा॥पतद्योमाश्रयस्तं

भःशाङ्कनीलमयोयथा॥५॥चलच्चामरवृंदेनतुंगोनीलगिरिर्यथा॥रत्नभूषण
मालाभिर्मेरुशृंगाकृतिर्बभौ॥६॥उत्तुंगेनकिरीटेनलिलेखजलदावलिं॥
तस्यतोइरझंकारैःक्षुभितःक्षीरसागरः॥७॥कृतबंदीजनस्तोत्रःसमरोत्स
वपीवरः॥महाकालस्ययाद्धासौवर्णनातिगसद्यशाः॥८॥संग्राममेदिनींप्रा
प्यसिंहनादंचकारसः॥तेनमेरुस्थनक्षत्रमालातलमिवागता॥९॥कैलासे
भीतिकंपेनपार्वत्यामुकुटोपतत्॥वाडवःसेवतेंभोधिंतत्कंपशमनेछया॥
॥१०॥भूमिभारभराक्रांतःशेषोपिचलनोद्यतः॥गिरयःकंपिताःसर्वेससि
हमिथुनास्तदा॥११॥अव्रणेनससैन्येनबहुलेनपरीवृतः॥तस्यनासीर
मालोक्यघृतमारीसमुत्थिता॥१२॥मुष्टिनादायवेगेनभ्रामयंतीहकुंजरा

न्॥ कुंजरेण जघानैवं तुरंगेण तुरंगमान्॥१३॥ हयसारथियुक्तांश्च रथांश्चि
क्षेप सा मुखे॥ पलायमानपदगान् जिह्वया लंबया रतान्॥१४॥ चचर्व च
महारावैः सशस्त्रान् दैत्यपुंगवान्॥ दुर्धरांश्छत्रसंघातैर्माययाव्यत्यनाव
रान्॥१५॥ चूर्णीकृतं शास्त्रलोहं दशनैर्वज्रसंन्निभैः॥ भस्मीकृतं जाठरे
णतस्याः स्यात्तद्रसायनं॥१६॥ ववृधे बलमत्युग्रं परापुष्टिश्च तत्क्षणात्॥
तामाह क्षोभितो दैत्यः पुष्टासि पशुभक्षणात्॥१७॥ सैन्यग्रासेन हे मारि ग्रा
समात्रं ममासि ह॥ दैत्येनाभिहितासैवं रूपं दिव्यं बभार च॥१८॥ ववर्षे सा
यकैर्दैत्यं मेघमालेव पर्वतं॥ नाल्पामपि व्यथां चक्रुस्ते बाणा दैत्यपुंगवे॥१९॥

म॰मा॰ रणकङूतिकंडूलेकडूशांत्येवनाभवन्॥२०॥उद्भ्राम्यगदयाव्योम्निजघानसहसा
॥५७॥ चतां॥तांगदांतलहस्तेनधृत्वाशूलंमुमोचतं॥२१॥तंशूलंमुष्टिनाॅयतांचचि दा
क्षेपदैत्यराट्॥२२॥अताडत्साखड्गेनस्कंधेदैत्यंचरंहसा॥सबाहुःपतितस्तस्य य स्त
ह स्कंधेनसैंभूतले॥२३॥सुस्रावशोणितंतत्रशोणतीर्थमभूत्तदा॥अन्योपि
बाहुरजनिदैत्यराजस्यतत्क्षणात्॥२४॥तथाकटककेयूरमुद्रिकाखड्ग
मंडितः॥अथसाभैरवंनादंविधायगगनंगता॥२५॥तस्माद्धवर्षसमरे
शिलावृष्टिंमहोपलां॥उत्पपात्चदैत्येंद्रोव्योमतावन्महींगता॥२६॥भुवम
भ्यागतोदैत्यःशरैस्तामप्यताडयत्॥अमोघास्तेशरास्तस्याविभिदुःसह
सावपुः॥२७॥शातंशिरसिबाणानांकुचयोःसप्तसप्ततिः॥ग्रीवायामुरसि ॥५७॥

स्कंधे शतानि च पृथक् पृथक्॥२८॥ नाभिदेशे ललाटे च वक्षस्यूर्वोश्च जा
नुनोः॥ असंख्येयाः शरा लेगुरिति तां विक्लीकृतां॥२९॥ विलोक्य शंभुः स
मरे दैत्यस्याभिमुखोभवत्॥ हय्यंगवीनराशेश्च कल्पांतदहनो यथा॥३०॥
॥२८॥ इति श्रीब्रह्मांडपुराणे क्षेभखंडे श्रीमल्लारिमाहात्म्ये घृतमारीयुद्धं ना
म पंचदशोऽध्यायः॥१५॥ ॥सनत्कुमार उवाच॥१॥ मार्तंडभैरवं देवं व्या
जहारासुरस्तदा॥ शौर्यासवघ्रमत्तोसो याहीति निजपर्वतं॥२॥ मदीयं
भवदीयं च देवं तुल्यं हे शिव॥ त्वमेकाकी वृषारूढः सेवितः कुंजरैरहं॥
॥३॥ मयि दिव्या निवासांसि त्वयि चर्मास्रगाविलं॥ मय्यस्ति कांचनी भू
षा कालास्त्वयि भुजंगमाः॥४॥ सुवर्णरजसा मिश्रं लेपनं चंदनस्य मे॥ त्वे

म॰मा॰
॥४८॥

तास्थिचूर्णसहितंभस्मतेप्रेतभूमिजं॥५॥एकातेतिपुराणास्त्रीमेसहस्त्रा
णियोषितां॥इदानींममपरःकोस्तिविभुस्त्रिभुवनेश्वरः॥६॥योद्धुंत्वयेतिस
हसाब्रुवाणःकिंनलज्जसे॥उन्मत्तकरिणास्पर्धांदर्पामेषीकरोतिकिं॥
॥७॥अलंसागरपानायमशकेनपिपासुना॥प्रलयाग्निमहाज्वालाःकिं
पतंगेनशाम्यति॥८॥किंकल्पमेघनोदायकल्पतेव्यजनानिलः॥मेरोरु
न्मूलनोद्योगंकुरुतेकिंमहोंदुरुः॥९॥वदंतमितिदैत्येंद्रंजघाजघाननि
शितैःशरैः॥दुर्वाक्यकोपसंपूर्णःशिवोमार्त्तंडभैरवः॥१०॥शरांस्तान्पदि ॥४८॥
शेनैवनिवार्यदनुजेश्वरः॥उदग्रकरवालोसौशिवंदुद्राववेगवान्॥११॥

तमायांतंसमालोक्यदुर्धरंधीरमानसः॥तीक्ष्णाग्रैःसायकैरुग्रैस्ताडयामास
भैरवः॥१२॥आकर्त्तरिमुखंबाणामग्नास्तेतुपिनाकिनः॥दैत्यांगेषुनमेनेसो
नखक्षतरुजामपि॥१३॥अथशंभुःसमुत्पत्यदृप्यधारासिनाजवात्॥
बाहौवामेमहादैत्यमताडयदनंतरं॥१४॥अवादयड्डमरुकमाञ्चलांडम
हारवं॥शिवश्चसिंहनादेनजगर्जदितिजेश्वरः॥१५॥तयोःप्रववृतेयु
द्धमद्भुतंचतयोरिव॥सुमेरुस्तुलनांयाति॥गिरिणान्यतमेनकिं॥१६॥त
त्राभूत्कुंजरोदैत्योव्योमतुंगःसुदारुणः॥यस्यलांगूलविक्षेपैःक्षुभिताःस
प्तसागराः॥१७॥रसेनप्लावयामासगिरीन्सर्वान्द्विजोत्तमाः॥प्रचंड
शुंडादंडस्यभीताःप्रोच्चलितस्य॥१८॥पलायंतेग्रहाःसर्वेनक्षत्राणींडभास्क

रो॥विहायशैलगेहानि सिद्धानां मिथुनानि च॥१९॥ननर्द गजराजोसौ सहस्र
घनगर्जितः॥तेनचंदानि मेघानां भ्रमोपेतुर्नभस्तलात्॥२०॥तटत्कारस्य तेना
सावताडि शशिसंभृता॥खड्गांगेन प्रलंबेन सप्राणेनेव मूर्धनि॥२१॥चर्मणा
तच्च खड्गांगं बभारोपरि चोपरि॥जहास तं महादैत्यो ज्ञातं बलमिति ब्रुवन्॥२२॥
ततोग्न्यस्त्रं कपर्दीशस्तं मुमोच रुषा वशः॥आताम्रज्वलनज्वालाबभ्रुर्गिरि
यस्तदा॥२३॥अस्त्रपातेन यादांसि समुद्रे पाकमाययुः॥आमेघमंडलं धू
मितदा मग्नाश्च तारकाः॥२४॥लोचनानि महेंद्रस्य वारि मुंचति हे द्विजाः॥
विस्फुलिंगैर्दिशो दग्धास्तरवो भस्मतां गताः॥२५॥तदा खराग्निसंघट्टाद्व्यो
मस्फुरितुमिच्छति॥२६॥धावंति तुरगाः स्वैरमर्धदग्धाश्च दंतिनः॥अप्सु

वनूरथसज्जानिलोहद्वेषाणिपिंनत्क्षणात् ॥२७॥ तत्यजुर्लोहसन्नाहान्दाह
कर्मकरान्भृशं ॥ वीराःपदातयोवाहाःसादिनोवाहकाअपि ॥२८॥ अहोश
स्त्राणितप्तानिकरतोमुमुचूरणे ॥ पुष्टमुष्टिवतोयुद्धेप्रज्वलन्मूर्ध्वमूर्ध्वजाः॥
॥२९॥ ज्वलंतिचामराण्यत्रसुच्छत्राणिध्वजांचलाः ॥ तत्रकज्जलतामापुरस्त्र
ज्वालावलीरताः ॥३०॥ कीलाचिटिपिटारावैःसर्वमापूरितंनभः ॥३१॥ त
टत्टत्कराःस्फोटामल्लस्यांगेसमुद्गताः ॥ क्षणंव्याकुलितोदैत्यःस्त्तस्यास्त्रस्य
प्रभावतः ॥३२॥ ततोसौधैर्यधीराशिर्मल्लनामामहासुरः ॥ अमुंचन्मोदि
रंचास्त्रंततःश्यामलितंनभः ॥३३॥ अग्निरस्त्रस्यनिर्वातस्तेनधाराभि
वृष्टिना ॥ बाष्पोष्मणापितत्सैन्यंव्यथामापद्द्विजोत्तमाः ॥३४॥ गेलुःपयांसि

म॰मा॰ धाराणांसंतप्ताःशैलसानवः॥दाहोत्तीर्णतयामेरुर्वर्णोत्कर्षमुपागमत्॥३५॥
॥५०॥ सिंसत्स्वरकराण्यत्रशस्त्राणिसकलंदधुः॥पानीयस्यपदंसद्यःसेनयोरु
भयोरपि॥३६॥लंबमानैसदामेघैर्व्योमनीलांजनप्रभं॥रराजकालखे
लस्यश्रीभाजनमिवापरं॥३७॥वर्षोपलैरतिस्थूलैःपतद्भिर्व्योममंडलात्॥
शिरांस्यस्फोटिवीराणांदानवानांसमंततः॥३८॥करकापातदूनाश्चेप
श्चाद्घर्घरसर्जनैः तुरंगाःपूर्वचरणेरुद्धुवुर्व्योम्निसांबुनि॥३९॥वर्षद्ध
षद्भिर्निहताःसशीर्षत्राणमूर्धसु॥पदातयोरणेव्यग्राःपलायंतेपराङ्मुखाः॥
॥४०॥धारासारसमूहेश्चव्याप्तःस्वर्गश्चभूतलं॥प्रलयार्णवमानेनचचा
लसलिलंक्षणात्॥४१॥शखोर्गणानांवाद्यंतिदंततूर्याणिसर्वशः॥वारुणा ॥५०॥

स्वजलौघेनपीडितानांद्विजोत्तमाः॥४२॥तरंतितुरगावारिस्फुरन्नासापुटद्व
याः॥खेलंतिकरिणःशुंडादंडुतांडवडंबराः॥४३॥निमज्जयंतिभारेणलोह
नेमिरथांगकाः॥तत्रास्त्रसलिलांभोध्यौवाजिनःप्लवतोरथाः॥४४॥इतिसैन्यं
जलेमग्नंदृष्ट्वासोमणिखंडनः॥जलंनिवारयामासमारुतास्त्रेणसत्वरं॥
॥४५॥शोषितंवारिविस्तारिनभोगजलधिस्थितं॥दिगंतंतूलवन्नीतंदैत्य
सैन्यंतथालघु॥४६॥मुमोचाथमहादैत्यःपन्नगास्त्रंसुदारुणंतेनास्त्रवायुर्गि
लितःसेनादष्टाचशांभवी॥४७॥गरुडास्त्रंततःशंभुर्मुमुचेतस्यपन्नगाः॥सैन्यं
महासुरस्यापिययुर्भीत्यारसातलं॥४८॥शंभुःपाशुपतास्त्रेणमंत्रितेनजघा
नतं॥त्रिशूलेनसुतीक्ष्णेनदैत्यंमल्लंरणांगणे॥४९॥निवार्यमाणंतच्छूलंगदया
मुद्गरेणच॥शरैर्मुसलघातैश्चशक्त्याचब्रह्मदत्तया॥५०॥चक्रेणपर्शुनाकुंतैः

म॰मा॰ करवालेन लांगलैः ॥ पपात हृदि मल्लस्य वृक्षे पविरिवाद्भुतं ॥५१॥ ततो हाहाकृ
॥५१॥ तं दैत्यैः क्षणादपि पलायितं ॥ रणे मल्लोप्यमचक्षुः पपात वसुधातले ॥५२॥ युध्य
स्तेरे मया सार्धं प्रहसन्निति तं हरः ॥ चरणं मूर्ध निरुषाद्दौ मल्लस्य संगरे ॥५३॥
शंभोः पदाब्जसंस्पर्शात्तस्य शांताथ दुर्मतिः ॥ निधाय मूर्ध्नि चरणं बाष्पपूरित
लोचनः ॥५४॥ नुनाव शंभुं परया भक्त्या मल्लासुरस्तदा ॥५५॥५३॥ इति श्री
ब्रह्मांडपुराणे क्षेत्रखंडे श्रीमल्लारिमाहात्म्ये मल्लासुरमार्तंडभैरवयुद्धं नाम
षोडशोध्यायः ॥१६॥ ॥ सनत्कुमार उवाच ॥१॥ जीवशेषो रणे दैत्यः परेशाकृ
पयावृतः ॥ स्तोत्रं चकार मल्लारेः शृणुध्वं तद्द्विजोत्तमाः ॥२॥ मल्लासुर उवाच ॥
॥३॥ पापोहं पापकर्माहं पापात्मा पापसंभवः ॥ मग्नं दुर्गतिपंकाब्धौ मां समुद्ध ॥५१॥

रशंकर ॥४॥ जीवाःस्वतंत्राःकर्तृत्वेनैवशंभोभवंत्यमी ॥ त्वंसूत्रधारस्सर्वेषां
कर्मणीहशुभाशुभे ॥५॥ त्वंसृष्टिकर्त्ताजगतांत्वयासर्वमिदंततं ॥ यस्माद्देवा
विभिन्नाःकिंत्वंजानासिपरेशतत् ॥६॥ बुद्धिरूपस्त्वमेवेशयथानुदसिली
लया ॥ तथाचराचरंकार्यंजगदेतत्प्रवर्त्तते ॥७॥ योदेवःसर्वभूतेषुबुद्धिरू
पेणवर्त्तते ॥ नमस्तस्मै८ ॥ नमस्तस्मै९ नमस्तस्मैनमोनमः ॥१०॥ योदेवःस
र्वभूतेषुमोहरूपेणवर्त्तते ॥ नमस्तस्मै११ ॥ नमस्तस्मै१२ ॥ नमस्तस्मैनमोन
मः ॥१३॥ योदेवःसर्वभूतेषुकामरूपेणवर्त्तते ॥ नमस्तस्मै१४ नमस्तस्मै१५
नमस्तस्मैनमोनमः ॥१६॥ योदेवःसर्वभूतेषुभ्रमरूपेणवर्त्तते ॥ नमस्त
स्मै१७ ॥ नमस्तस्मै१८ नमस्तस्मैनमोनमः ॥१९॥ योदेवःसर्वभूतेषुधर्म

रूपेण वर्त्तते॥ नमस्तस्मै २० नमस्तस्मै २१ नमस्तस्मै नमो नमः॥२२॥ यो देवः सर्व
भूतेषु हर्षरूपेण वर्त्तते॥ नमस्तस्मै २३ नमस्तस्मै २४ नमस्तस्मै नमो नमः॥२५॥
यो देवः सर्वभूतेषु क्रोधरूपेण वर्त्तते॥ नमस्तस्मै २६॥ नमस्तस्मै २७ नमस्मै नमो
नमः॥२८॥ यो देवः सर्वभूतेषु मदरूपेण वर्त्तते॥ नमस्तस्मै २९॥ नमस्तस्मै ३० न
मस्तस्मै नमो नमः॥३१॥ यो देवः सर्वभूतेषु दंभरूपेण वर्त्तते॥ नमस्तस्मै ३२
नमस्तस्मै ३३ नमस्तस्मै नमो नमः॥३४॥ यो देवः सर्वभूतेषु अहंरूपेण वर्त्त
ते॥ नमस्तस्मै ३५ नमस्तस्मै ३६॥ नमस्तस्मै नमो नमः॥३७॥ यो देवः सर्वभूते
षु आत्मरूपेण वर्त्तते॥ नमस्तस्मै ३८ नमस्तस्मै ३९ नमस्तस्मै नमो नमः॥४०॥
यो देवः सर्वभूतेषु वीररूपेण वर्त्तते॥ नमस्तस्मै ४१ नमस्तस्मै ४२ नमस्तस्मै नमो

नमः॥४३॥योदेवःसर्वभूतेषुक्रियारूपेणवर्त्तते॥नमस्तस्मै४४नमस्तस्मै४५।नम
स्तस्मैनमोनमः॥४६॥योदेवःसर्वभूतेषुशक्तिरूपेणवर्त्तते॥नमस्तस्मै४७नम
स्तस्मै४८।नमस्तस्मैनमोनमः॥४९॥योदेवःसर्वभूतेषुशौर्यरूपेणवर्त्तते॥नम
स्तस्मै५०नमस्तस्मै५१।नमस्तस्मैनमोनमः॥५२॥योदेवःसर्वभूतेषुमृत्युरूपेण
वर्त्तते॥नमस्तस्मै५३नमस्तस्मै५४नमस्तस्मैनमोनमः॥५५॥योदेवःसर्वभूते
षुज्ञानरूपेणवर्त्तते॥नमस्तस्मै५६नमस्तस्मै५७नमस्तस्मैनमोनमः॥५८॥यो
देवःसर्वभूतेषुलोभरूपेणवर्त्तते॥नमस्तस्मै५९नमस्तस्मै६०नमस्तस्मैनमोन
मः॥६१॥योदेवःभूतेषुविद्यारूपेणवर्त्तते॥नमस्तस्मै६२नमस्तस्मै६३नमस्तस्मै
नमोनमः॥६४॥योदेवःसर्वभूतेषुभक्तिरूपेणवर्त्तते॥नमस्तस्मै६५नमस्तस्मै६६
नमस्तस्मैनमोनमः॥६७॥नमःकारूण्यपूर्णायनमःसंहारहेतवे॥नमःप्रपंचवि

डुषेप्रपंचरहितायते॥६८॥नमस्तेविष्णुरूपायशिवरूपायतेनमः॥नमःपरम
हंसायनमश्चिन्मात्ररूपिणे॥६९॥नमःसूक्ष्मायसन्यायस्थूलरूपायतेनमः॥
नमस्त्रैलोक्यनाथायभैरवायनमोनमः॥७०॥भक्तवात्सल्ययुक्तायनमस्त्रि
पुरभेदिने॥नमस्तस्मै७१नमस्तस्मै७२नमस्तस्मैनमोनमः॥७३॥स्तोत्रेणमल्ल
दैत्यस्यपरितुष्टःसदाशिवः॥प्रत्युवाचरणेदेवोवृणीष्वेतिवरंपरं॥७४॥मल्ल
उवाच॥७५॥देवेंद्रोदासतांनीतःप्रतापेनमहीयसा॥निर्विशंकंसुखंभुक्तम
प्राप्यंत्रिदशैरपि॥७६॥परलोकस्यकाचिंतात्वयिदृष्टेपरावरे॥७७॥की
र्तिर्लोकेकिरणेमृत्युर्भवतोजगतःपते॥प्रार्थनीयंकिमस्त्यन्यत्तथापिप्रार्थ
येशिव॥७८॥ममाभिधानंपूर्वंलेनाम्नोभूयात्सुरेश्वर॥शिरःप्रेतंचपादाधः

स्थानुतेममसर्वदा॥७९॥छेदपातादिभक्त्यायेभवंतं पर्युपासते॥तेषांशीघ्र
तरंवांछांयदितुष्टोसिपूरय॥८०॥यन्मयाभवतःस्तोत्रंकृतंप्राणप्रयाणके॥
प्रत्यहंतस्यपाठेननृणांसिद्धिप्रदोभव॥८१॥नलोभोनचदारिद्र्यंनदुःखं
नाशुभामतिः॥नासौख्यंनचमात्सर्यंतेषांभवतुसर्वदा॥८२॥सरस्वती
रसमयीवक्त्रेलक्ष्मीगृहेषुच॥८३॥भक्त्युद्रेकेणदेवेशत्वांजनाःपर्युपास
तेतेषांत्वंसुलभःस्वामिन्प्रसन्नःस्यासदाशिव॥८४॥श्रीमार्त्तंडभैरवउवाच॥
॥८५॥तुष्टोहंतवयुद्धेनभक्त्याचपरिपूर्णया॥त्वयायत्प्रार्थितंमल्ल तदस्तु
ममशासनात्॥८६॥सनत्कुमारउवाच॥८७॥मल्लेचविलयंप्रामेयुद्धा
याजग्मुरुत्कलाः॥मल्लस्यपुत्राःपंचैवकुंभःस्थलस्तथैवच॥८८॥देवगंध

म॰मा॰
॥५४॥

र्वनामा च तथा लोहार्गलाभिधः॥ महाबाहुरिति ख्याता भक्तजा इत्युपेक्षि
ताः॥८९॥ तथापि ब्रोच्छलदर्पास्तान् शशाप सदाशिवः॥ यूयमेवं विधाम्
र्वाः शैलतां व्रजताम्भुच॥९०॥४३॥ इति श्रीब्रह्मांडपुराणे क्षेत्रखंडे श्रीमल्ला
रिमाहात्म्ये मल्लासुरविरचिता सदाशिवस्तुतिर्नाम सप्तदशोध्यायः॥
॥१७॥ ॥सनत्कुमार उवाच॥१॥ अथ सप्त समाहूय पुत्रान् धर्मस्य तान्मु
नीन्॥ सन्मानपूर्वं सानंदं बभाषि चंद्रशेखरः॥२॥ निहतोसो महादैत्यः
शत्रुर्बलमदोत्कटः॥ लीलया नीजयेदानीं से वध्वं सुखमीप्सितं॥३॥ म
हाप्रसाद इत्युक्त्वा प्रणिपत्य महेश्वरं॥ शिवं विज्ञापयामासुर्भवितव्यं
स्वयंभुवा॥४॥ देवेन श्रीमता चाम्ररक्षार्थं नः कृपा कृता॥ कलिकाले कृतेर्दे ॥५४॥

षैः पीडितानां सुखाय च ॥५॥ तथास्त्विति प्रतिज्ञाय निजशक्त्या युतः शिवः ॥
लिंगद्वयमभूत्तत्र चंचकल्मतरोरधः ॥६॥ मार्गशीर्षेमले पक्षे षष्ठ्यां वारेंशुमा
लिनः ॥ शतताराग ते चंद्रे लिंगं स्याद्दृष्टिगोचरं ॥७॥ आगताः सुदिने तस्मिन्या
त्रार्थं त्रिदशा दिवः ॥ सकलत्राः सपुत्राश्च मुनयः सकुटुंबकाः ॥८॥ नागांगनायु
ताः सर्पाः सिद्धाः स्वतरुणीयुताः ॥ गंधर्वाः किंनरा यक्षाः स्वर्वेश्या मेनकादयः ॥
॥९॥ तत्र क्षेमपुरं जातं राजधानी मणिद्विषः ॥ सर्वेषां वर्णजातीनां ध्यानगम्या
सुरैः कृता ॥१०॥ मूर्तिर्महीमयी शंभोर्यथा मार्तंडभैरवी ॥ अश्वेन सादिना पार्श्व
वर्त्तिना मणिना युता ॥११॥ मः शंभुश्च विष्णुश्च ताविलायां सदा स्थितौ ॥ तदा
मेलापदं जातं तामारातीति विग्रहात् ॥१२॥ मेलार इति मल्लारेर्नामधेयम

भूलदा॥सावर्ण्यंरलयोःप्रोक्तंमैरालइतितेनवा॥१३॥तस्मैमैरालदेवायनमइत्यवदन्सु
राः॥अभ्यर्च्यपार्थिवंदेवंपुष्पैर्नंदनसंभवैः॥१४॥धूपैर्दीपैश्चतांबूलैःपशुभिःपात्रपू
रणैः॥लेह्यचोष्यापहारैश्चगीतैर्नृत्यैर्मनोरमैः॥१५॥भक्ष्यैःखाद्यैर्दर्पणैस्यदर्श
नैश्चामरैरपि॥चंद्रकस्तूरिकालेपहरिद्राचूर्णचंदनैः॥१६॥सिंदूरपूरैःपाच्या
चरूष्णोशीरैःसुतंडुलैः॥मायूरस्चामरश्वातैस्तरुणीनांमहोत्सवैः॥१७॥संतो
ष्यतुष्टुवुर्देवामल्लारिंमुनयोपिच॥१८॥देवर्षयऊचुः॥१९॥जयदेवजगन्ना
थजयखंडेंदुशेखर॥जयगंगाजटाजूटजयविश्वैकपालक॥२०॥जयम
ल्लमहादैत्यसैन्यदेहविमर्दन॥जयोल्लोलमहाखड्गजयपात्रोल्लसत्कर॥
॥२१॥जयश्रीम्हालसाकांतत्रिशूलधरमल्लहन्॥जयप्रतापविस्तारिन्

जयत्वंमणिसूदन॥२२॥जयश्वेतासनासीनजयमार्त्तंडभैरव॥जयत्रिपुरवि
च्छेदजयमल्लासुरांतक॥२३॥नमःसंगरवीरायनमोरुद्रायशूलिने॥अंधक
ध्वंसिनेतुभ्यंनमोवागीश्वरायते॥२४॥निहंत्रेमल्लदैत्यस्यभर्त्रेविश्वस्यतेनमः॥
सुरार्चितांघ्रयेनित्यंनमःकंदर्पमर्द्दिने॥२५॥नमोमल्लारिदेवायमैरालनमो य
नमः॥कलिदोषविनाशायनमोभक्तप्रियायते॥२६॥नमःकारुण्यपूर्णाय
नमःसंहारहेतवे॥नमःकनकगौरायनमश्चांपेयरोचिषे॥२७॥सनत्कु
मारउवाच॥२८॥मृन्मयोपिचमल्लारिश्चेतनात्माभवत्तदा॥उवाचसमुनी
न्देवान्वृणुध्वंमितिसद्वरं॥२९॥देवर्षयऊचुः॥३०॥देवेनश्रीमतासर्वंकृतं
विश्वस्ययद्धितं॥उत्तीर्णोवसुधाभारोमल्लदैत्यचमूकृतः॥३१॥तथापि

देवकर्त्तव्यंयेषांचेतसिवर्त्तसे॥ गृहेषुतेषामतुळाकमलात्यागभोगदा॥ ३२॥ ब
हवःपशवःपुत्रास्तुरंगाःसुखमीप्सितं॥ शत्रूणांनिःकंटकंराज्यंवाजिकुंजर
संकुलं॥ ३३॥ देशकोशपरीवारललनारत्नसुंदरं॥ सौभाग्यंयोषितांभूरि
सौख्यंपुत्राःशतायुषः॥ ३४॥ नित्यंभूपालमान्यत्वंसर्वदाविजयोरणे॥ वि
वादेवादिनांतेषाविपरीतार्थभाषितौ॥ ब्रह्मांडखंडविस्तारियशोभूयात्स
मुज्वलं॥ अंतेमोक्षपदंदेहिपानोमल्लमर्दन॥ ३६॥ शतानिसप्तश्लोकानां
माहात्म्यंतवशंकर॥ नित्यंपठंतिमल्लारितेषांत्वंवरदोभव॥ ३७॥ लिखि
त्वापुस्तकंचैतत्पूजयंतिनिरंतरं॥ सुखंधान्यंधनंस्वर्गयशोभाग्यंजयोद
यः॥ ३८॥ तेषांभवतुमल्लारिपुत्राविद्याविशारदाः॥ अरयःसंक्षयंयातुग्र

हंनंदतु सर्वदा ॥३९॥ ग्रहभूतपिशाचाद्या डाकिन्यो यक्षराक्षसाः॥ तत्र बाधान
कुर्वंतु सर्पाद्याः क्रूरजातयः॥४०॥ स्थावरं जंगमं वापि कृत्रिमं चापि यद्विषं॥
मंत्रयंत्राभिचाराद्यास्तत्र कुंठीभवंतिति॥४१॥ श्रीमल्लारिरुवाच॥४२॥ इदानीं
प्रार्थितं देवायुष्माभिर्मुनिभिश्च यत्॥ सर्वमस्तु मनुष्याणां सर्वदा मदनुग्रहा
त्॥४३॥३८॥ इति श्रीब्रह्मांडपुराणे क्षेत्रखंडे श्रीमल्लारिमाहात्म्ये सुरर्षिस्तु
तिवरप्रदानं नाम अष्टादशोऽध्यायः॥१८॥ ॥ऋषय ऊचुः॥ कलिकालमल
ध्वंसि मल्लारेश्चरितं श्रुतं॥ ब्रह्मनंदनैस्तैर्वाक्यात्तेनास्मन्नः कृतार्थता॥१॥ल द
ब्ध्यानि मंत्रवीर्याणि दारिद्र्यं नः पलायितं॥ फलंतीह तपांसीव त्वत्प्रसादान्म
हामुने॥२॥ इदानीं श्रोतुमिच्छामो मल्लनाथप्रभावतः॥ मुने प्रेमपुरस्था

नितीर्थानित्वन्मुखांबुजात्॥३॥सनत्कुमारउवाच॥श्रृणुध्वंब्राह्मणानून
मस्मिन्ब्रह्मपुरोत्तमे॥सार्धकोटित्रयंपुण्यंतीर्थानांवर्ततेधुना॥४॥तेषां
प्रशंसाकथनेनविभुःपद्मसंभवः॥नषण्मुखोनशेषोपिशोच्यःकोहंत
थापिच॥५॥मुख्यानांतत्रकेषांचित्कथयामिप्रभावतः॥श्रृणुध्वंब्राह्म
णानृणांसर्वसिद्धिफलप्रदं॥६॥देवस्यचोत्तरेभागेशक्तिकुंडंतुतिष्ठ
ति॥तत्रचांपेयषष्ठ्यांवाभानुवारेचवैधृतौ॥७॥व्यतीपातेचसंक्रां
तौनवम्यामाश्विनस्यच॥चत्र्यांचैवतथाषष्ठ्यांकार्तिक्यांकृत्तिकासु
च॥८॥अथवाजन्मनक्षत्रेस्नानंकृत्वाचमौनवान्॥मूलीभूतःस्थितः
पूर्वंविष्णुर्दैत्यंसमागतः॥९॥मूलदेवइतिप्रोक्तःसुरैःसंपूजितःस्वयं॥

संपूज्यघृतमारींचदेवींसिद्धिप्रदायिनीं॥१०॥यस्तुपश्यतिदेवेशंमल्लारिंपूजय
त्यपि॥सप्तजन्मकृतंपापंदर्शनात्तस्यनश्यति॥११॥ब्रह्मघ्नोवासुरापोवास्व
र्णहृद्वृषळीपतिः॥कृतघ्नःसुरभिघ्नश्चतथाविश्वासघातकः॥१२॥अगम्या
गमनीयश्चपूजनाच्छुद्धिमाप्नुयात्॥लभतेशाश्वतींलक्ष्मींराजवश्यंमह
द्यशः॥१३॥कैळासशिखरेवासःप्रज्वलद्रत्नमंडले॥भोगान्भुनक्तिविविधा
न्यावच्चंद्रार्कतारकाः॥१४॥देवादाग्नेयदिग्भागेगयातीर्थंसुदुर्लभं॥पदंय
त्रास्तिमल्लारेःशृणुध्वंतत्फलंद्विजाः॥१५॥तत्रस्नात्वातिलैर्युक्तंकुशदर्भे
णसंयुतं॥पिंडंददातियस्तत्रपदेगोत्रंसमुच्चरन्॥१६॥पितृणामक्षया
तृप्तिर्जायतेतस्यहेद्विजाः॥तत्राख्यानंपुरावृत्तंशृणुध्वंमेघवाहने॥१७॥

म॰मा॰ कल्मेपुराधनोत्साहेनगरेभून्महाधनी॥ वणिक्चंद्राननस्तस्यपुत्रोभूत्कू
॥५८॥ टदुर्मतिः॥१८॥ तेनकूटतुलाःकृत्वावंचिताःक्रयविक्रये॥ जनास्तेनैवपा
पेनवायसोभूद्विहंगमः॥१९॥ विचरन्स्वेच्छयाखेसौयावनालार्ध्वकंदस्थ
तू॥ अयाततस्यगलितंतच्चंचूपुरतःपदे॥२०॥ तेनतस्याभवत्तृप्तिः
पितॄणांतोषकारिणी॥ विमुक्तस्तेनदेहेनसयौस्वर्गंसनातनं॥२१॥ दिवा
दुत्तरदिग्भागेतीर्थंकापिलसंज्ञितं॥ तस्मिन्कपिलषष्ठ्यांयःस्नात्वामल्ला
रिभैरवं॥२२॥ पूजयेदुत्तमैःपुष्पैःपाच्यावादूर्वयापिवा॥ सयातिचर्म
देहेनस्वर्गभोगप्रदंशिवं॥२३॥ विनाकपिलषष्ठींचयादृशेतादृशे
दिने॥ स्नानमात्रंविधायेवमल्लारिंपश्यतिक्षणं॥२४॥ तस्ययात्राक्तन ॥५८॥

पापानिब्रंह्महत्यासमानिच॥नश्यंतितत्क्षणादेवभोगान्भुनक्तिशाश्वता
न्॥२५॥ईशानकोणेमल्लारिर्गुप्तंमल्लेश्वराभिधं॥तीर्थवापीमयंक्रोशमात्रे
तिष्ठतिपुण्यदं॥२६॥तस्योदकस्यपानेनचूलकार्द्धेनतत्क्षणात्॥सर्वपा
पैर्विनिर्मुक्तःपुमान्यातिपरांगतिं॥२७॥तत्रेतिहासमप्याद्यंकथयामासप
द्मभूः॥शृणुध्वंब्राह्मणास्तंचविश्वविस्मयकारकं॥२८॥ब्रह्मोवाच॥पुरास्वा
रोचिषमनौवर्त्तमानेप्रयागके॥क्षेत्रेक्षत्रीमहाबाहुर्दैवाद्दारिद्र्यपीडितः॥
॥२९॥चोरःसजातोमार्गेषुजघानब्राह्मणान्दश॥वधूवराणिसतैवसत
कन्यास्सुलक्षणाः३०॥अगण्यान्वणिजःशूद्रान्पथिकान्धनशंकया॥
वसन्नरण्येकस्मिंश्चिदसोव्याघ्रेणभक्षितः॥३१॥यमलोकंगतस्तत्रभुक्ता

थनिरयांस्ततः॥तस्यपापेनपितरःकुंभीपाकेनियोजितः॥३२॥शेषकिल्बिषभो
गायगर्दभोभूत्सपापवान्॥पत्तनेनंगचूलाख्येसोमदत्तस्यमंदिरे॥३३॥या
त्राप्रसंगात्तेनासौभारवाट्सतुरासभः॥आनीतःसोमदत्तेनतदाश्रमपुरं
प्रति॥३४॥पीडितोसौतृषातत्रबद्धःकीलेथवर्त्तत॥तत्तीर्थजलशेषस्तुकुं
भस्तेनावलेहितः॥३५॥तत्क्षणाद्गार्दभंरूपतृषापंचत्वमागतं॥स्वर्गेततो
थबुभुजेशक्रसामीप्यमागतः॥३६॥स्रक्चंदनानिदिव्यानिकामिनीरलका
मुखाः॥नृत्यंतिपितरस्तस्यकेलासंसहसागताः॥३७॥सक्षत्रीसार्वभौ
मोभूत्सिंहविक्रमकेसरीपपालमेदिनींसर्वांसमुद्रवलयांकितां॥३८॥
मल्लारेर्दक्षिणेभागेतीर्थंपापविनाशनं॥तत्रस्नात्वासमालिंग्याश्वत्थं ॥५९॥

भैरवरूपिणं ॥३९॥ मल्लारिं च ततः पश्येत्सर्वपापैः प्रमुच्यते ॥ यत्कृतं पूर्वजैः
पुंभिर्महापापादिकं महत् ॥४०॥ यत्कृतं जन्मनां लक्षैः स्वयमंहः सुदुस्तरं ॥
तत्सर्वं विलयं याति तस्य तीर्थस्य सेवनात् ॥४१॥ तस्य तीर्थस्य सामीप्ये नंदीकुं
डं तु वर्तते ॥ तत्र स्नातस्य यत्पुण्यं श्रृणुध्वं तद्द्विजोत्तमाः ॥४२॥ गवां सुवर्णशृं
गीणां लक्षं ताम्रांशुकावृतं ॥ दोहकांस्यैरपि युतं तथा रौप्यखुरान्वितं ॥४३॥
पयस्विनीनां सूर्येंद्वोर्ग्रहणे मंत्रपूर्वकं ॥ वेदविद्भ्यः प्रदाने न यत्फलं तल्लभस
वेध्रुवं ॥४४॥ पुनर्मल्लारिदेवेशं यः पश्येत्परमेश्वरं ॥ तस्य पुण्यस्य माहा
त्म्यं ब्रह्मा जानाति वा न वा ॥४५॥ धन्वंतरशतादस्ति देवादीशानकोणतः ॥ रुद्रकुं
डं महातीर्थं योगिनामपि दुर्लभं ॥४६॥ स्नानमात्रेण तत्रैव पुनर्जन्म न विद्य

म॰मा॰ ति॥ज्ञानमुत्पद्यतेसद्यःस्वात्मनःपरिपूर्णता॥४७॥भोगेच्छुभिर्नतत्सेव्यंभव
॥६०॥ ध्वंसविधूननं॥श्रीगुरोःकरुणापांगैर्यैस्कृतंतद्भवेध्रुवं॥४८॥पुरातनमिति
हासंश्रृणुध्वंतद्द्विजोत्तमाः॥इंद्रस्थलाग्रहारस्थःशंभुदत्तोद्विजःपुरा॥४९॥
कर्मैकनिष्ठःसततंसदाचारप्रियःसदा॥नसाध्वितिकृतंकर्ममन्यतेहृ
वै दिसैदा॥५०॥पुनःशंकाकुलंकर्मकरोत्येवसदादरात्॥कृत्वाविरुद्धंमनु
तेविषादंगाहतेपुनः॥५१॥इतिसंशयबुद्धेस्तुतस्याभूदायुषःक्षतिः॥गतो
सौधर्मसदनंपुण्यपापविचारणं॥५२॥चित्रेणचित्रगुप्तेनकर्मतस्येतिनि
श्चितं॥कृत्वायंवैदिकंकर्मवृथागतमितिस्फुटं॥५३॥मेनेतेनास्यतत्पापंये
नस्यान्नरकेस्थितिः॥सभुक्त्वानरकानुग्रान्कीटजन्मशतानिच॥५४॥अ ॥६०॥

भूत्पक्षी सततीर्थे पीत्वांच्चाजलं क्षणात्॥ विमुक्तः पक्षिदेहेन ब्राह्मणोऽभूत्सुबु
द्धिमान्॥५५॥ उत्पन्नं सहजं ज्ञानं येन पश्यति चिन्मयं॥ विश्वं चराचरं स्वात्मरू
पं जलतरंगवत्॥५६॥ अंबुधाराक्षिप्यं तीर्थमुत्तरस्थं शिवालयात्॥ तत्रस्ना
त्वांबु पीत्वा च मल्लारिं यस्तु पश्यति॥५७॥ मुच्यते प्राक्तनैः पापैः स याति त्रिद
शालयं॥ अत्रेतिहासमप्येकमवदन्नृषयः पुरा॥५८॥ आसीदवंत्यां कंदर्पो
भूपतिः श्रीप्रतापवान्॥ तेन राज्यमदांधेन प्रलोभं प्रापिताः स्त्रियः॥५९॥ अ
न्येषां हृतिकोद्योगैर्वस्त्रालंकारभूषणैः॥ अन्यैश्च विविधैर्भोगैः सुवर्णैर्नय
दृच्छया॥६०॥ बभूव गोचरो मृत्योः स राजा कालशासनात्॥ लिंगदेहस्य यो
गेन दूतैर्नीतो यमालया॥६१॥ बहुधा तत्र नरकान्बुभुजे तीव्रदुःसहान्॥

च्चिरं ततोभुक्तशेषपापभुक्तयेभुवंययौ॥६२॥ विधात्राभृंगरूपेणसंसारेवि
नियोजितः॥कदाचिदंबुधारिस्मिंस्तरंगेराप्लुतःक्षणं॥६३॥स्थितःकल्हार
केयस्मिंल्लूतंतत्पूजनायच॥तद्गंधलुब्धोभ्रमरःसहतेनशिवंययौ॥६४॥
अपश्यतत्रमल्लारिंजहौभृंगकलेवरं॥पुनःकंदर्परूपोसौकंदर्पःक्षितिपा
लकः॥६५॥बुभुजेसकलांपृथ्वींसाब्धिद्वीपांसपर्वतां॥चंद्रांशुधवलांकी
र्त्तिंलेभेधर्मरतःसदा॥६६॥ ॥इतिश्रीब्रह्मांडपुराणेक्षेत्रखंडेश्रीमल्लारि
माहात्म्येभष्टतीर्थवर्णनंनामएकोनविंशोध्यायः॥१९॥ ॥ऋषयऊचुः॥
मुनीशाःश्रुतमस्मात्सिरष्टतीर्थ्याःफलंमहत्॥तथापिश्रोतुमिच्छामस्तीर्था र्थे
न्यन्यानितेमुखात्॥१॥सनत्कुमारउवाच॥श्रूयतामृषयस्तीर्थफलंप्रेम

पुरःसरं ॥ मुख्यानां षष्टिमतुलं तीर्थानां कथयाम्यहं ॥ २ ॥ रामतीर्थे महापुण्ये स्ना
त्वा पश्येन्मणिद्विषं ॥ सप्तजन्मकृतं पापं तत्क्षणादेव नश्यति ॥ ३ ॥ स्नात्वा मल्लेश्वरे
तीर्थे मल्लारिं यस्तु पश्यति ॥ ब्रह्महत्यादिकं पापं तस्य नश्यति दर्शनात् ॥ ४ ॥ स्नात्वा
सूर्यास्थिधे तीर्थे मासमेकं शुचिर्नरः ॥ मल्लारेः प्रांगणे नक्तं दिवं सेवेत बुद्धिमान् ॥ ५ ॥
तस्याष्टादश कुष्ठानि नश्यंति शिवतां व्रजेत् ॥ लभेत भोगानखिलान्यशो लक्ष्मीः
सुखायुषः ॥ ६ ॥ क्षेत्रस्य पूर्वदिग्भागे शोणतीर्थमनुत्तमं ॥ तत्र स्नात्वा शिवं नत्वा
मुच्यते दैन्यपातकैः ॥ ७ ॥ वैतरिण्यां तु यः स्नायात्सूर्ये द्वोग्रहणे नरः ॥ मल्लारिं च
ततः पश्येद्विष्णुलोकं स गच्छति ॥ ८ ॥ पर्शुधाराभिधं तीर्थं स्नान्मुक्तिप्रदं नृणां ॥
शिवतीर्थे महापुण्ये स्नात्वा पश्यति यः शिवं ॥ ९ ॥ मोक्षार्थी लभते मोक्षं भोगा

र्थीभोगमाप्नुयात् ॥ क्षेत्रस्य दक्षिणे भागे कोटितीर्थं महाफलं ॥१०॥ तत्र स्नातस्य
पापानां नाशमायांति कोटयः ॥ तत्समीपे महापुण्यमश्वतीर्थं सुदुर्लभं ॥११॥
तत्र स्नात्वा च दत्वा च स्वर्गं यांति नराः स्वयं ॥ तत्सन्निधौ शक्तितीर्थं शक्तिलो
कप्रदायकं ॥१२॥ स्नानमात्रेण लोकानां भुक्तिं मुक्तिं यच्छति ॥ क्षेत्रस्य पूर्व -च
दिग्भागे कुंडमुग्रं सुतीर्थकं ॥१३॥ तत्र स्नानेन दानेन दशयज्ञफलं लभेत् ॥
तीर्थं गणपतेस्तत्र स्नात्वा ये लड्डुकान्बहून् ॥१४॥ सदक्षिणान् ब्राह्मणेभ्यः
प्रयच्छंति गणाधिपं ॥ अर्चयंति नरास्तेषां विघ्नो दूरात्पलायते ॥१५॥ भैर
वेण स्वहस्तेन मृगयायां हतः किटिः कालभैरवकुंडाख्यं जातं भैरवशास
नात् ॥१६॥ प्रयागः संगमो नद्योयत्र न्यग्रोधपादपः ॥ आस्ते महान्माघमा

सेरवावर्ध्यौदितेनरः॥१७॥तस्योदकस्पर्शमात्रान्मल्लारेःप्रियतांव्रजेत्॥स्ना
नेनलभतेमुक्तिंभोगान्मल्लारिदर्शनात्॥१८॥यस्नायान्मासमेकंतुप्रयाग
फलमश्नुते॥सर्वतीर्थेषुयःस्नायात्सर्वतीर्थफलंचसः॥१९॥तीर्थमेकादशा
ख्यंहितत्रैकादशवासरं॥स्नात्वामल्लद्विषंपश्येद्रुद्रलोकेमहीयते॥२०॥म
ल्लस्यवारुणंचास्त्रंयत्रशांतंमहीतले॥तत्राभूद्वारुणंतीर्थंतत्स्नानान्मुक्ति
प्र दंनृणां॥२१॥यत्रप्रक्षालितौपादौपार्वत्यालीलयानिजौ॥तत्राभूत्पार्वती
तीर्थंभैरवेणाभिवंदितं॥२२॥यत्रोदबिंदुसंसिक्ताकोपाद्धंगामहींगता॥व
भंडभैरवेणासोपार्वत्याचसदाशिवः॥२३॥पार्वत्यागंगयोरैक्यंगंगामा
लसिकाभिधं॥निर्ममेसुंदरंरूपंप्रीत्यांकेस्वेदधारतत्॥२४॥शक्तित्वेन

जगत्पूज्यंसुरासुरनमस्कृतं॥ तत्तीर्थस्नानमात्रेणसर्वान्भोगान्लभेत्पु
मान्॥२५॥अंतेगुरुमुखात्ज्ञानंसच्चिदानंदविग्रहं॥श्रुत्वावतारंमल्लारे
र्नागैःप्रेमपुरंप्रति॥२६॥भोगावतीप्रेषितातत्स्नानंयज्ञफलप्रदं॥अगस्ति
र्गौतमश्चात्रिःपुलस्त्योऽथगुरंगिराः॥२७॥भरद्वाजोवसिष्ठश्चकश्यपः
सनकस्तथा॥जमदग्निर्भार्गुरिश्चच्यवनश्चसनातनः॥२८॥अंबरीषःसु
राचार्यःकहोलश्चराशारः॥मतंगःपौंड्रकश्चैवकौशिकःकण्वसंज्ञितः॥२९॥
वत्सोवैश्वानरोबुद्धिर्मांडव्यःकुंडनाभिधः॥व्यासःसांख्यायनःकुत्सोगाल
वःसोभरिस्तथा॥३०॥वात्सायनश्चशांडिल्योमांडूकायनइत्यपि॥वा
ल्मीकिश्चैवजाबालिरत्रिर्यत्रकृतंतपः॥३१॥तत्तीर्थंतदाख्येयंन्नृणां

मुक्तिप्रदं शिवं ॥ मल्लारेराज्ञया स्नानमात्रात्प्रेमपुरस्थितं ॥ ३२ ॥ ऋषिनामानि
तीर्थानि पंच त्रिंशद्द्विजोत्तमाः ॥ अग्निकुंडाभिधं तीर्थं स्नानमात्रेण यन्नृणां ॥
॥ ३३ ॥ दहत्यश्रीपदं तीर्थं महतामेनसां चयं ॥ यमतीर्थे तु यः स्नायात्तस्य यमं
नैव पश्यति ॥ ३४ ॥ अवगाहनकंदर्पतीर्थस्य सुभगो भवेत् ॥ स्नायाद्यो ब्रह्म
णस्तीर्थे ब्रह्मलोकमवाप्नुयात् ॥ ३५ ॥ स्नात्वा हरिहरे तीर्थे हरीशप्रियतां व्र
जेत् ॥ कुबेरतीर्थे यः स्नायात्स धनी भवति ध्रुवं ॥ ३६ ॥ स्नानेन वायुतीर्थस्य
बलवान् जायते नरः ॥ महिमा षष्ठितीर्थानां ब्रह्मणा समुदीरिता ॥ ३७ ॥ सुल
भा सर्वलोकानां भुक्तिमुक्तिसुखप्रदा ॥ ३८ ॥ ॥ इति श्रीब्रह्मांडपुराणे क्षेत्र
खंडे श्रीमल्लारिमाहात्म्ये षष्ठितीर्थवर्णनं नाम विंशतितमोऽध्यायः ॥ २० ॥ ॥

ऋषयउचुः॥ब्रह्मपुत्रत्वयाख्यातंतीर्थानांवर्णनंशुभं॥तेनतृप्तावयंनूनंत्व
त्प्रसादेनसन्मुने॥१॥कलौसिद्धिप्रदंनृणांमल्लारेःपूजनात्फलं॥इच्छा
मःसर्वथाश्रोतुंयद्गुह्यंभुवनत्रये॥२॥सनत्कुमारउवाच॥कथयामि
समासेनरहस्यंपारमेश्वरं॥पूजनस्यफलंविप्राःश्रवणात्सर्वकामदं॥३॥
येकुर्वंतिसदाभक्तिंमल्लारेस्तेजनाःप्रियाः॥मल्लारिणाशिवेनोक्ताभक्ति
रष्टविधातथा॥४॥श्रीमल्लारिरुवाच॥भक्तिःप्रीतिःकथाकांक्षाममध्या
नंतथाजपः॥पूजानुमोदनंस्तोत्रमावेशोनोपजीवनं॥५॥भक्तिरष्ट
विधाचैषायोस्यांम्लेंछोपिवर्त्तते॥सविप्रेंद्रोमुनिःश्रीमान्सयतिःसच
पंडितः॥६॥समुक्तःसर्वपापेभ्योशिवलोकेमहीयते॥ब्रह्मस्तपिशा

चोग्राडाकिनीपूतनादयः॥७॥चोराःसर्पागजाव्याघ्रानपीडांतत्रकुर्वते॥रा
जानोमित्रतांयांतिवादिनोमूकताअपि॥८॥आपदःशत्रवोरोगाश्चैवरक्षो
पिविषाणिच॥अभिचाराःकुयंत्रादिनस्पृशंतिचतंनरं॥९॥नमेप्रियश्चतु
र्वेदीविप्रोविद्याविशारदः॥याज्ञिकःश्रोत्रियोवान्योवतारस्यास्यपूजकः॥
॥१०॥प्रियोमेसर्वदायस्तुमद्भक्तःश्वपचोपिवा॥तस्मैदेयंततोग्राह्यंसचपू
ज्योयथाह्यहं॥११॥योमांसर्वगतंपश्येत्सर्वंचमयिसंस्थितं॥तस्याहंनि
त्यमात्मस्थस्तरंगेसलिलंयथा॥१२॥इतिभक्तिःसमासेनकथितामुनि
सत्तमाः॥इदानींसविशेषेयंभक्तिःसम्यक्निगद्यते॥१३॥आचार्यंतुस
मभ्यर्च्यसर्वस्वेनस्वशक्तितः॥सुवर्णवस्त्रभूषाद्यैःपरितोषंपरंनयेत्॥१४॥

म॰मा॰ लब्ध्वातस्यमुखांभोजान्मल्लारेर्मंत्रमुत्तमं॥न्यासपूजाविधिंसर्वंध्यानमास
॥६५॥ नपूजनं॥१५॥योजपेतमनुंधीमान्ध्यानपूर्वंसुभक्तितः॥सलभेततत्फलंभक्तेः
सदाचारशुचिर्नरः॥१६॥शुचौपूजागृहेरम्येधौतेवागोमयांचिते॥धौतांशु
पुष्प कवितानेनैर्मालोपशोभिते॥१७॥स्वर्णस्यरचितामूर्त्तिरुत्तमाकामदानृणां॥न
दृष्टावितुरूप्यस्यताम्रस्यारस्यवातथा॥१८॥शिलापृथ्वीमयीवापिप्रतिष्ठाविधि
पूर्वकं॥त्रिशूलंडमरुंखड्गंपानपात्रंधराशुभा॥१९॥युक्ताचगंगाभालस्यास
र्वालंकारशोभिनी॥वस्त्राद्यलंकृतांतांचमनसावापिचिंतितां॥२०॥माहात्म्य
पुस्तकंचैतदथवास्थापयेत्सुधीः॥सोवर्णेराजतेपीठेताम्रजेदारुजेथवा॥२१॥
सुवस्त्रांतरितेतस्मिन्संस्थाप्याभ्यर्च्यपुरस्ततः॥कर्पूरचंदनाद्यैस्तदापूर्यमनु ॥६५॥

पूर्वकं ॥२२॥ तदंबुबिंदुसंसर्गि कुसुमाद्यैः समर्चयेत् ॥ मल्लारिं भावसंयुक्तः
शृणुध्वं तत्फलं द्विजाः ॥२३॥ पार्यातकस्य कुसुमैर्मल्लारिं पूजयेत्तु यः ॥ स या
तींद्रपदं शक्रो ब्रह्मत्वमधिगच्छति ॥२४॥ अर्चयेदंबुजैः शुभ्रैर्नीलरक्तैर्मणिद्वि
षं ॥ कल्पलक्षं वसेत्स्वर्गे सशक्रसमतां गतः ॥२५॥ शंखवर्णा शोणवर्णा स्व
र्णवर्णा च मालती ॥ अर्चयेत्कुसुमैस्तस्या मल्लारिं देवप्तमिपं ॥२६॥ आब्रह्म
कल्पं लभते स्वस्थितिं शिवसन्निधौ ॥ इह लोके शुभान्कामान्कमलालंकृतो न
रः ॥२७॥ कृष्णै रक्तैः सितैः पितैः शतपत्रैर्यजेद्विभुं ॥ पार्यातकसमं तस्य फ
लं पूर्णमनोरथं ॥२८॥ हेम्नः पुष्पाणि यः कुर्यात्कलधौतस्य वा पुनः ॥ मैराल
मर्चयेद्देवं पार्यातकफलं व्रजेत् ॥२९॥ चांपेयैर्बकुलैः कुंदैः पुन्नागैः सुरप

र्णजैः॥ पाटलैर्मल्लिकाजातैः किंशुकैर्नगकेसरैः॥ ३०॥ मल्लारिमर्चयेद्यस्तु रुद्र
लोके महीयते॥ अवाप्य लोकानखिलान्कीर्तिं दिग्वलयांकितां॥ ३१॥ कदंबैः
क्षेत्रकोसुंभैरैलैरेवतिकाभवैः॥ मल्लारिं पूजयेत्पुष्पैः प्रियभृत्यः शिवोभवेत्॥
॥ ३२॥ चारुवर्णैः कर्णिकारैरशोकतरुसंभवैः॥ कांचनारस्य कुसुमैः करवी
रैः सितासितैः॥ ३३॥ मल्लद्विषं पूजयेद्यः कलिदोषैर्न लिप्यते॥ प्रयातविवि
धान्भोगान्रुद्रलोके महीयते॥ ३४॥ अर्कमंदारकनकसिंधुवारसमुद्भवैः॥
जपाबंधूकसिंदूरकर्णिकागिरिमल्लिकैः॥ ३५॥ पुष्पैः संपूजयेद्देवं सया
ति परमां गतिं॥ लक्षमेकं तु शारदां वसेद्रुद्रस्य संन्निधौ॥ ३६॥ रुद्राक्षयस
मुद्भूतैरागस्त्यैश्चूतवृक्षजैः॥ अर्चयेत्पार्वतीशं यः शतपत्रफलं व्रजेत्॥ ३७॥

पाच्यासमर्चयेच्छंभुंकृष्णा।शिरेणवापुनः॥मल्लारेःप्रेमपात्रत्वमाकल्पंसव्रजेद्धनी॥
॥३८॥नागवल्लीदलैःशुभ्रैःकृष्णैर्वापूजयेद्विभुं॥सयातिनागलोकेस्यस्वाम्यं
मल्लारिशासनात्॥३९॥सुकोमलैश्चचूताग्रैर्जंबग्रैःस्निग्धलोहितैः॥येपूज
यंतिमल्लारिंसर्वलोकेषुपूजिताः॥४०॥सुरूपाःसुभगाधन्यास्तेभवंतिशता
युषः॥मंजूलावाग्विलासेनस्वात्मज्ञानैकतत्सराः॥४१॥बिल्वपत्रैश्चराजानो
भूमौतेस्वर्गसंश्रयाः॥गंगापत्रीद्रोणपुष्पीसुरपर्णीमरूबका॥४२॥बर्बरीतु
लसीचेतिपूजितोमल्लसूदनः॥यैस्तेवसंतिकैलासेकल्पकोटिशतानिच॥४३॥
दूर्वापामार्गजातिभ्यःपरितुष्टःसदाशिवः॥आयुरारोग्यमैश्वर्यंनृणांदत्तेन
संशयः॥४४॥चैत्रशुक्लचतुर्दश्यामितरस्मिन्दिनेथवा॥मल्लारिंदमनेनै

म॰मा॰
॥६७॥

वपूजयेत्समहोत्सवं॥४५॥सयातिभोगानखिलान्परत्रचपरांगतिं॥अरिंद
मयतेश्रीमानित्याहभगवांछिवः॥४६॥पूजयेत्तंदुलैर्धूतैरजनीचूर्णरंजि
तैः॥मुखस्तंभंकरोत्येवशत्रूणांवादिनामसौ॥४७॥धूपंदीपंचनैवेद्यंखाद्यं
पानंपशुंतथा॥तांबूलंचसकर्पूरंचंदनंमृगनाभिजं॥४८॥वस्त्रालंकारर
त्नानिनार्यःकुंकुममुत्तमं॥अश्वंवित्तानुसारेणसुवर्णचामरादिकं॥४९॥गीतं
वाद्यंप्रेक्षणीयंजयघंटासमन्वितं॥अन्यांश्चविविधान्भोगान्येपर्यंतिपरेश्वरे॥
॥५०॥मल्लारौतेनराचात्रभोगान्यांतिकलौभुवि॥यद्यच्चित्तेचिंतयंतिप्राप्नुवं
त्यखिलंचतत्॥५१॥सर्वोपभोग्यागमलारत्नालंकृतयोषितः॥वाजिनःकुं
जरास्तुंगामल्लारेःपूजनात्फलं॥५२॥वसंतकेलिलीलाभिरुपचारैर्यथावि ॥६७॥

ध्यि ।। चैत्रशुक्लतृतीयादि मासमेकं महोत्सवात् ।। ५३ ।। पूजयेन्मालसायुक्तं मल्ला
रिं देवभूपतिं ।। ससुखी कामिनीहस्ताच्चामरैर्वीजितः क्षितौ ।। ५४ ।। कंदर्पमू
र्त्तिर्भवति राजतुल्यप्रतापवान् ।। सेवंते सिद्धगंधर्वयक्षविद्याधरास्तथा ।।
।। ५५ ।। रंभातिलोत्तमामुख्यास्तं कैलासे नरोत्तमं ।। स मल्लारिप्रसादेन शिव
स्यानुचरो भवेत् ।। ५६ ।। आषाढे श्रावणे वापि मासे यस्तु पवित्रकैः ।। दिनमेकं
तु वासाद्य पवित्रो जायते नरः ।। ५७ ।। सप्तजन्मकृतं पापं विलयं याति तस्य वै ।।
लभेन्मुक्तिं परमां श्रीमन्मल्लारिशासनात् ।। ५८ ।। महानवम्यां मल्लारेर्देव्याः
श्रीतिपुरःसरं ।। शृणोति कलहं यस्तु कुरुते पूजनं द्वयोः ।। ५९ ।। नारीणां प्रे
मपात्रं स्यान्नारी तु सुभगा भवेत् ।। मोक्षार्थी लभते मोक्षमन्यथा स्वर्गमाप्नु

यात् ॥६०॥ मार्गादिदिवसाद्यावदेकवध्याद्द्विजादिकान् ॥ आषष्ठिभोज
येद्द्विजान्बहून्यावैभवेच्छया ॥६१॥ लक्ष्मीस्तस्यकुलेगेहेसोल्लासानंदते
ध्रुवं ॥ यात्रांमल्लारिदेवस्यमार्गषष्ठ्यादिपर्वसु ॥६२॥ कुर्वंतितेषांयज्ञस्य
स्युःफलानिपदेपदे ॥ यद्वित्तंव्ययमाप्नोतिमार्गेतिस्मिंस्तदक्षयं ॥६३॥ सुधा
रूपेणलभतेपुमान्स्वर्गेनसंशयः ॥ येमल्लारिंसमुद्दिश्यसुवर्णगोतुरंग
मान् ॥६४॥ वस्त्रालंकारधान्यानिरत्नानिनिजशक्तितः ॥ रवेर्दिनेप्रय
च्छंतितेषांसन्निहितःशिवः ॥६५॥ यज्ञकोटिफलंपूर्णंजायतेनात्रसंशयः ॥
उपोष्यशनिवारंतुमल्लारिंपूजयंतिये ॥६६॥ पूर्णकामाःसलक्ष्मीकान
राःसद्योभवंतिते ॥ विघ्नानिनाशमायांतितेषांनृणांमहांतिच ॥६७॥

एकभक्तंरवेर्वारेकदाचित्कुरुतेनरः॥मल्लारेःप्रियभक्तोसौलभतेसमनो
रथान्॥६८॥अन्नदानंप्रकुर्वंतिमल्लारिप्रीतयेनराः॥सिक्तमात्राणिया
वंतितावद्वर्षाणिभुंजते॥६९॥पीयूषंनित्यंसेवंतेस्वर्गेशक्रैसन्निधौ॥स्य
मल्लस्यहंतुःप्रीत्यैयेकुंकुमाक्षतपूर्वकं॥७०॥तांबूलदानंकुर्वंतिदेवस्ते
षांसमीपगः॥प्रांगणेपरमेशस्यहरिद्राचूर्णसंभवाः॥७१॥पतंतिपां
सवोभूमौयेषांपूजावशेषिताः॥यावंतोगगनोद्भूतास्तावद्वर्षशतानिच॥७२॥
प्राप्नुवंतिमहाभोगान्शिवलोकेसनातनान्॥इहलोकेपिविविधान्सर्वांश्च
र्यकरान्शुभान्॥७३॥ ॥इतिश्रीब्रह्मांडपुराणेक्षेत्रखंडेश्रीमल्लारिमाहात्म्येश्रीरि
मल्लारिपूजाविधिनिरूपणंनामएकविंशतितमोध्यायः॥२१॥ ॥ ॥

म॰मा॰ ॥६९॥

श्रीमल्लारिरुवाच॥तस्मात्सर्वप्रयत्नेन मयिभक्तिःसुदुर्लभा॥लभ्यते मानुषेः
सा तु न पूर्वसुकृतैर्विना॥१॥येषां गृहे मदीया तु प्रतिमा पूज्यते सदा॥तेषां गृ
हे सदा लक्ष्मीश्चिरवासा सुरर्षयः॥२॥इदं मदीयमाहात्म्यपुस्तकं लिखितं
गृहे॥तिष्ठते तस्य माहात्म्यं शृणुष्वंत द्विजोत्तमाः॥३॥तत्र नो ग्रहभूतेशाः
शाकिनीडाकिनी तथा॥पूतनाश्च महावीर्याः कृत्या रक्षःपिशाचकाः॥४॥
प्रेतभैरवकूष्मांडास्तथैवोग्राश्च मातरः॥आपदेशिकलोकाश्च तथा च सु
विखेचराः॥५॥यक्षगंधर्वपक्षिण्यश्चेटकोपि विषाणि च॥ये च क्रूरा ग्रहाः
सर्वे सहजा ब्रह्मराक्षसाः॥६॥व्याघ्रसर्पभुजंगाश्च तस्कराद्यादयोपि च॥
ये पूर्वजन्मकलुषप्रभावा रोगसंचयाः॥७॥उपघाताश्च ये चान्ये उष्टजू ॥६९॥

तस्मनातस्समुद्भवाः॥ नपीडांतत्रकुर्वंतिममाज्ञानान्यथाभवेत्॥८॥ गृहेतस्य
महालक्ष्मीःकल्पांतासंततिस्तथा॥ किमत्रबहुनोक्तेनतत्कुलंरक्ष्यतेमया॥
॥९॥ एतन्ममैतन्माहात्म्यंयःशृणोतिद्विजोत्तमाः॥ यावदक्षरमर्यादामश्व
मेधफलंलभेत्॥१०॥ यःश्रावइष्यतिनरोमाहात्म्यमिदमुत्तमं॥ सोहमेवन
संदेहःपूज्योवस्त्राश्वभूषणैः॥११॥ योप्यस्याक्षरमप्येकंशृणोत्यन्यमुखाद
पि॥ सोचिरेणैवकालेनममयातिसलोकतां॥१२॥ एतन्ममैतन्माहात्म्यं
यःपठेत्प्रयतोनरः॥ सोचिरेणैवकालेनलभतेवांछितंफलं॥१३॥ अष्टम्यां
चचतुर्दश्यांनवम्यांचविधूदये॥ शिवरात्र्यांतथाचंपाषष्ठ्यांयःप्रयतोन
रः॥१४॥ पठतेशृणुतेवापितत्फलंप्रोच्यतेकथं॥ त्रिंशत्कोट्योपियेदेवास्त्व

म॰मा॰
॥८०॥

धिकायेपिसर्वशः ॥१५॥ ममशासनतः सर्वेतस्यकिंकरतामियुः ॥ नानेन
सदृशोयज्ञोनानेनसदृशोमनुः ॥१६॥ नानेनसदृशंपुण्यंनानेनसदृशाग
तिः ॥ बहुनात्रकिमुक्तेनजपयज्ञव्रतानिच ॥१७॥ तीर्थदानतपोधर्मदेवताय
तंनानिच ॥ वापीकूपतडागानियेचान्येधर्मसंचयाः ॥१८॥ नार्हंतिश्रवणस्या
स्यसर्वेसाहस्त्रिकींतनुं ॥ दंभेनकपटेनापिबलाद्वापिप्रसंगतः ॥१९॥ यःश्रृणो
तिनरःसोपिममवल्लभतामियात् ॥ नमेप्रियस्तथास्वामीनमेलंबोदरःप्रियः ॥
॥२०॥ नतथाप्रियतेगोरीयथाश्रोतास्यमानवः ॥२१॥ किंतेनजातेनसुते
नसर्वथायोभक्तिमान्योमयिसर्वभावैः ॥ दहाम्यहंपातकराशिसंचयंमद्रो
हकारीनहिविंदतेसुखं ॥२२॥ अस्यस्तोत्रस्यमाहात्म्यंश्रुतस्यपठितस्यच ॥ ॥८०॥

शेषोप्यनंतवदनैवक्तुं पारं न यास्यति॥२३॥ दीर्घायुरत्र ब्रह्मापिच्चतुर्वदन
पंकजेः॥ न वक्तुं पारमायाति माहात्म्यश्रवणस्य च॥२४॥ तस्मात्किमत्र ब
हुना यो मद्भक्तः सनातनः॥ सोहमेव न संदेहो ममेतद्वचनं यथा॥२५॥
सनत्कुमार उवाच॥ एवमुक्त्वा तु मल्लारिस्तान्सर्वान्विससर्ज च॥ ते
पि प्रहृष्टमनसः सुस्थाः स्वस्थानमाययुः॥२६॥ अष्टाशीतिसहस्रा
णि तस्मात्पूर्वं कलौ युगे॥ पक्षपातेन विप्राणामगात्कैलासभूपतिः॥
॥२७॥ स तत्र भुक्तिं मुक्तिं च कलौ सिद्धिं प्रयच्छति॥ तस्मात्कलौ युगे
नान्यप्रभावो विद्यते सुराः॥२८॥ श्रीशिव उवाच॥ एवमुक्त्वा तु विप्रर्षि
मल्लारिं मनसार्चयत्॥ ऋषयोपि महात्मानं तं प्रणम्य प्रतुष्टुवुः॥२९॥

म॰मा॰
॥७३॥

ऋषयऊचुः॥ महर्षेउःखपं कस्थावयमुद्धारितास्त्वया॥ श्रुत्वामल्लारिमाहात्म्यं
हर्षश्चेतसिजायते॥३०॥ ततोधिकोस्तिकोदेवोदेवदेवान्महेश्वरात्॥ यस्य
वेदानचत्वारोरूपंविंदंतितत्वतः॥३१॥ अतःकलौयुगेघोरेभयंकस्यास्ति
नोमुने॥ किमत्रबहुनोक्तेनजीवदानंत्वयाकृतं॥३२॥ श्रीशिवउवाच॥ ए
वंस्तुत्वामहात्मानंतंविप्रंमुनिपुंगवं॥ स्वाश्रमानाययुःसर्वेयज्ञदेवजपो
त्सवाः॥३३॥ तस्मात्पार्वतितत्राहंकलौसिद्धिप्रदोनृणां॥ तत्क्षेत्रंतीर्थमध्ये
कंभुक्तिमुक्तिफलप्रदं॥३४॥ अधिष्ठितंमयादेवित्वयाचकृपयानृणां॥
येनकेनापिभावेनयद्यदिच्छतिमानवः॥३५॥ तस्मात्सर्वप्रयत्नेनसर्वभावेन
सर्वदा॥ अहमेवबुधैःसेव्योनान्यःकश्चनविद्यते॥३[illegible]॥ यद्गुह्यंपरमंदेविश्र ॥७३॥

त्स्यात व वरानने ॥ प्रेम्णा संप्रोक्तमेतस्मात्किमन्यच्छ्रोतुमिच्छसि ॥ २७ ॥ ॥
इति श्रीब्रह्मांडपुराणे क्षेत्रखंडे श्रीमल्लारिमाहात्म्ये श्रीमल्लारिवाक्यं नाम द्वा
विंशतितमोध्यायः ॥ २२ ॥ ॥ श्रीरस्तु कल्याणमस्तु ॥ श्रीमल्लारिमार्त्तंड म्हा
ळसाकांतार्पणमस्तु ॥ ॥ श्रीशके १७५४ चित्रभानुनामसंवत्सरे माघशुक्ले
द्वितीया सोमवासरे रखबडे इत्युपनामकरंगो सखारामेण मल्लारिमाहात्म्यमं
ग्रोध्दारस्य पुस्तकं लिखितं समाप्तं ॥ स्वार्थं परार्थं च ॥ ॥ अनेन प्रीयतां देवो
भगवान्म्हाळसापतिः ॥ श्रीमार्त्तंडः पूर्वेषामस्माकं कुलदैवतं ॥ १ ॥ ॥
॥ छ ॥

स.गी.
॥७४॥

॥७४॥

```
[OrderDescription]
,CREATED=26.11.19 13:37
,TRANSFERRED=2019/11/26 at 13:54:11
,PAGES=144
,TYPE=STD
,NAME=S0002163
,Book Name=M-624-MALLARI MAHATMAY
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
```

```
FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
```

```
FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
```

```
FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
```

```
FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
```

```
FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
```

```
FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
```

```
FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
```

```
FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
```

```
FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF
```

```
FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,
```